# Shri Kunchitanghri Stava

# શ્રી કુઞ્ચિતાઙ્ઘ્રિસ્તવઃ

## Document Information

Text title : Shri Kunchitanghri Stava

File name : kunchitAnghristavaH.itx

Category : shiva

Location : doc_shiva

Proofread by : Aruna Narayanan

Description/comments : From shrInaTarAjastavamanjarI

Latest update : July 10, 2022

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# Shri Kunchitanghri Stava

# શ્રી કુઞ્ચિતાઙ્ઘ્રિસ્તવઃ

શ્રીમદુમાપતિશિવપ્રણીતઃ
શ્રીગણેશાય નમઃ ।
શ્રી ચિત્સભેશાય મઙ્ગલમ્ ॥

કુઞ્ચિતાઙ્ઘ્રિં નમસ્કૃત્ય કુણ્ડલીકૃતગાયકમ્ ।
કુઞ્ચિતાઙ્ઘ્રિં સ્તવં વક્ષ્યે બ્રહ્મનિષ્ઠ ઉમાપતિઃ ॥

બ્રહ્માણ્ડં યસ્ય દેહં રવિજદિશિપદો વક્ત્રવૃન્દાન્યુદીચ્યાં
તદ્વૈરાજાન્તરઙ્ગે વિલસતિ હૃદયામ્ભોરુહે દક્ષિણાગ્રે ।
મધ્યે સમ્મેલનાખ્યે મુનિવરમનસા ભાવિતે યન્ત્રરાજે
યશ્શક્ત્યા નૃત્યતીશસ્તમપિ નટપતિં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧॥

પઞ્ચાશત્કોટિસઙ્ખ્યા પરિમિતધરણિ શ્રીવિરાડાખ્યધાત્રો-
રેકસ્વાન્તાબ્જભિત્તિસ્થિત કનકમહાયન્ત્રરાટ્કર્ણિકાયામ્ ।
નૃત્યન્તં ચિત્સભેશં ત્રિસૃભિરપિ સદા શક્તિભિસ્સેવિતાઙ્ઘ્રિં
નાદાન્તે ભાસમાનં નવવિધનટનં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨॥

યસ્મિન્નામૂલપીઠાવધિ કનકશિલામાતૃકાવર્ણક્લૃપ્તે
બ્રહ્મશ્રીનાથરુદ્રેશ્વર શરમુખભાક્સામ્બસાદાખ્યમૂર્ધ્નિ ।
ભૂતૈશ્શાસ્ત્રૈશ્ચ વેદૈઃ સ્તુતબહુચરિતં સ્તમ્ભરૂપૈશ્ચ કુડ્યે
નૃત્યન્તં ચિત્સભેશં નિરવધિસુખદં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૩॥

યત્સંસત્પૂર્વભાગે દિશિદિશિ વિલસત્પૂર્વભાગા નિતાન્તં
સ્વાન્તર્ગૂઢોત્તરાંશાશ્શિવમુખ ભવનાશ્ચાગમાઃ કામિકાદ્યાઃ ।
અષ્ટાવિંશાનુસઙ્ખ્યા ધૃતકનકમય સ્તમ્ભરૂપાઃ સ્તુવન્તિ
સ્તુત્યં તં નૃત્તમૂર્તિં શ્રુતિશતવિતુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૪॥

યદ્ગોષ્ઠ્યાં દ્વારબાહ્યે રજતગિરિનિભં પઞ્ચવર્ણસ્વરૂપં
સોપાનં દ્વારભાગં જયવિજયમુખૈ રક્ષિતં દ્વારપાલૈઃ ।

તત્ત્વાનાં ષણ્ણવત્યા સહ વિધિમુખરાઃ પઞ્ચ દેવાશ્ચ નિત્યં
    યસ્યાન્તર્ભાન્તિ તસ્મિન્નવિરતનટનં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૫॥

યત્સ્તૂપ્યશ્શક્તિરૂપાઃ તદધરવિલસદ્રોમરૂપાશ્ચ કીલાઃ
    ઉચ્છ્વાસાઃ સ્વર્ણપટ્ટાઃ તદુદરનિહિતા દણ્ડરૂપાશ્ચ નાડ્યઃ ।
નાડ્યન્તસ્સર્વલોકાઃ ફલકતનુગતા હસ્તરૂપાઃ કલાશ્ચ
    તસ્યાં યો નૃત્યતીશઃ તમનુપમતનું કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૬॥

વિઘ્નેશસ્કન્દલક્ષ્મી વિધિમુખશરરાટ્પાદુકાવજલિઙ્ગ-
    જ્યોતિર્નૃત્તસ્વરૂપૈઃ વરુણમુખજુષા હાટકાકર્ષમૂર્ત્યા ।
સ્વાગ્રે દક્ષે ચ વામે પરિવૃત સદસિ શ્રીશિવાનાયકો યો
    મધ્યે નૃત્તં કરોતિ પ્રભુવરમનઘં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૭॥

આદૌ માસે મૃગાખ્યે સુરગુરુદિવસે તસ્ય ભે પૂર્ણિમાયાં
    ભિત્તૌ શ્રીચિત્સભાયાં મુનિવરતપસા દત્ત વાક્પૂર્તયે યઃ ।
નૃત્તં કૃત્વાઽવસાને ફણધરવપુષં વ્યાઘ્રપાદં મહર્ષિં
    ચાહૂયાભ્યાં અદાત્ યો નિયતનિવસતિં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૮॥

યસ્મિન્નૃત્યત્યનાદૌ નિકટતટગતૌ ભાનુકમ્પાખ્યબાણૌ
    શઙ્ખધ્વાનૈઃ મૃદઙ્ગધ્વનિભિરપિ મહામ્ભોધિ ઘોષં જયન્તૌ ।
યસ્યોઙ્કારપ્રભાયાં ધ્વનિમનુસહિતા રશ્મયશ્ચૈકવિંશા
    વિધન્તે તં સભેશં નતસુરનિકરં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૯॥

પૂર્વં માધ્યન્દિનિર્યચ્છિવજનિમવરં પૂજયન્યત્પ્રસાદાત્
    લબ્ધ્વા વ્યાઘ્રાઙ્ઘ્રિભાવં તનયમપિ શિવાનુગ્રહાદ્દુગ્ધસિન્ધુમ્ ।
આનીયાસ્મૈ પ્રદત્વા સદસિ ચ પરમં દૃષ્ટવાન્યસ્ય નૃત્તં
    તં દેવં ચિત્સભેશં નિગમનુતગુણં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૦॥

યન્નૃત્તધ્યાનયોગદ્વિગુણિતતનુભૃત્ શ્રીશસંવાહભુગ્ન-
    સ્વાઙ્ગશ્શેષઃ કદાચિદ્ધરિમુખ કમલોત્પન્નયદ્વૃત્તમાધ્વીમ્ ।
પીત્વા તસ્વાઽતિઘોરં રજતગિરિબિલદ્વારમાર્ગેણ યસ્ય
    ક્ષેત્રં પ્રાપ્યાન્વપશ્યન્નટનમધિસભં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૧॥

આદૌ યઃ કર્મકાણ્ડ પ્રવચનમહિમા જૈમિનિર્નામ યોગી
    વ્યાસોક્ત્યા ચિત્સભેશં પ્રભુવરમુરસાઽઽનમ્ય ગત્વા સભાન્તઃ ।
પાદાન્તે વેદયુક્તં સ્તવવરમકરોત્સર્વ સૌભાગ્યદં યં
    પશ્યન્નદ્યાપિ દેવં સદસિ વસતિ તં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૨॥

ગૌડેશઃ સિંહવર્મા સ્વતનુગતરુજા વ્યાકુલસ્સ્વીયદેશાત્
    આગત્ય સ્વર્ણપદ્માકરવરસલિલસ્નાન નિર્મુક્તરોગઃ ।
ભૂત્વા શ્રીહેમવર્મા મુનિવરસહિતશ્શમ્ભુનૃત્તં ચ દૃષ્ટ્વા
    યત્પ્રાસાદં વિચિત્રં મણિમયમકરોત્ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૩॥

આમ્નાયેષ્વપ્યનન્તેષ્વનિતરસુલભાન્ભિન્નસંસ્થાન્વિધીન-
    પ્યાહૃત્ય શ્રીફણીન્દ્રો નટયજન મહપ્રોક્ષણાર્થઞ્ચ સૂત્રમ્ ।
કૃત્વાઽઽદૌ દત્તવાન્ યત્તદુદિત વિધિના યં સદાઽઽરાધયન્તિ
    ત્રૈસાહસ્રં દ્વિજેન્દ્રાઃ તમપિ નટપતિં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૪॥

નિત્યં ષટ્કાલપૂજાં નટનપતિમુદે કુર્વતાં ભૂસુરાણાં
    તદ્ભક્તાનાં દ્વિજાદિ પ્રમુખતનુભૃતાં સૌખ્યદાતા ભ્રકુંસઃ ।
સ્વસ્થાને લિઙ્ગમેકં સ્ફટિકમણિમયં મજ્જનાદીનિ કર્તું
    યજ્વભ્યો દત્તવાન્ યસ્તમતિસુખકરં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૫॥

અન્તર્વેદ્યાં મહત્યાં શતધૃતિરકરોદબ્દસાહસ્ર સાધ્યં
    યજ્ઞં તસ્મિન્મુનીન્દ્રાસ્સદસિ સમભવન્વ્યાઘ્રપાદોક્તિભિર્યે ।
તત્પૂજાર્થં શિખીન્દ્ર પ્રભવમણિનટઃ પ્રેષિતો યેન મોદાત્
    તન્મૂર્તેર્મૂલભૂતં નવમણિમકુટં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૬॥

નિત્યં પુણ્યાહમાદૌ ગુરુવરનમનં શોષણાદિ ત્રયં ચ
    ભૌતીં શુદ્ધિં કરાઙ્ગ પ્રણવસુરમુખન્યાસ જાતં ચ કૃત્વા ।
જપ્ત્વા મન્ત્રાન્ સમસ્તાન્ શિવમયતનવશ્ચાન્તરારાધ્ય યં પ્રાક્
    વિપ્રા બાહ્યે યજન્તિ પ્રભુવરમપિ તં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૭॥

સ્થાનાદિ પ્રોક્ષ્ય પાદ્યાચમનમપિ સુમૈરર્ચયિત્વાઽથ શઙ્ખં
    ગવ્યાર્ચાં કુમ્ભપૂજાં જલયજન વૃષાભ્યર્ચને દ્વાર પૂજામ્ ।
કૃત્વા વિઘ્નાદિપૂજાં સ્ફટિકજનિમરત્નેશયોર્મજ્જનાદ્યૈઃ
    યન્મૂર્તિં પૂજયન્તિ પ્રતિદિનમનઘાઃ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૮॥

ગવ્યૈસ્તૈલૈઃ પયોભિર્દધિઘૃત મધુભિશ્શર્કરાભિશ્ચ શુદ્ધૈઃ
    પશ્ચાત્પઞ્ચામૃતાદ્યૈઃ લિકુચફલરસૈઃ કૈરપાથોભિરન્નૈઃ ।
ગન્ધૈઃ ગઙ્ગાદ્ભિરન્યૈરનુદિનમનઘા યસ્ય લિઙ્ગં મુનીન્દ્રાઃ
    ષટ્કાલં પૂજયન્તિ પ્રભુમપિ તમજં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૯॥

ભિત્તૌ શ્રીચક્રસંસ્થાં તદનુ નટપતિં શૈવચક્રાન્તરસ્થં

તદ્વામે યુગ્મહસ્તામપિ ચ શુકકરાં જ્ઞાનશક્તિઞ્ચ યષ્ટ્વા ।
ગોબ્રહ્માદીનથેષ્ટ્વા સકલવિધચરૂનર્પયિત્વા બલીંસ્તાન્
હોમં કૃત્વા યજન્તિ પ્રતિદિનમપિ યં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૦॥

ધૂપૈર્દીપૈ રથાખ્યૈઃ ફણિપુરુષવૃષૈઃ કુમ્ભપઞ્ચાગ્નિહોત્રૈઃ
ઋક્ષૈઃ કર્પૂરભસ્મવ્યજનવરસિતચ્છત્રકૈશ્ચામરૈશ્ચ ।
આદર્શૈઃ મન્ત્રપુષ્પૈરુપરિતલસુકર્પૂરકૈઃ પ્રાર્ચ્ય યં દ્રાક્
ત્યક્ત્વાઽવિદ્યાં પ્રપશ્યન્ત્યનુદિનમનઘાઃ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૧॥

યદ્ગેહ પ્રાન્તબાહ્યે દશવૃષસહિતાન્યબ્જપીઠાનિ નિત્યં
શક્રાદીનાં ત્રિકાલેષ્વપિ બલિહરણે પીઠમુત્તુઙ્ગમન્યત્ ।
યદ્બાહ્યે દિક્ષુ ચાગ્રે નવશિખરિસમા ભાન્તિ દણ્ડા ધ્વજાનાં
તદ્ગેહાન્તસ્સભાયાં અનવરતનટં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૨॥

પ્રત્યબ્દં જ્યેષ્ઠમાસે નવવૃષસહિતાઃ કેતવો ભાન્તિ માઘે
માસે પઞ્ચ ધ્વજાસ્સ્યુઃ મૃગશિરસિ તથા કેતુરેકઃ પ્રધાનઃ ।
યસ્ય બ્રહ્મોત્સવાનાં નવશરશિખિનશ્ચૈકવહ્નિઃ પ્રધાનઃ
તં દેવં ચિત્સભેશં નવનિધિનિલયં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૩॥

યસ્યાદ્યે સપ્તવિંશત્યમલદિનમહે ઋત્વિગગ્ર્યા નવ સ્યુઃ
માઘે પઞ્ચર્ત્વિગગ્ર્યા મૃગશિરસિ શિવર્ક્ષોત્સવે ચૈક એવ ।
નિત્યાર્ચાસ્વેક એકો યજનકૃત ઇમે યજ્વવર્યેષુ શુદ્ધાઃ
તં દેવં ચિત્સભેશં નિરુપમિતતનું કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૪॥

આદૌ કૃત્વાઽગ્નિહોત્રં વપનપવનમન્ત્રાચમાનાનિ પશ્ચાત્
કૂશ્માણ્ડૈર્દેહશુદ્ધિં પદયજનમુખં વાસ્તુપર્યગ્નિકર્મ ।
નાન્દીમૃત્સ્વઙ્કુરાણિ પ્રતિસરમૃષભપ્રોક્ષણં યન્મહેષ્વ-
પ્યારાદારોહયન્તિ ધ્વજપટમનઘાઃ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૫॥

મઞ્ચે ચન્દ્રાર્કભૂતેષ્વપિ વૃષગજરાડ્રાજતાદ્રિષ્વથાશ્વે
સોમાસ્કન્દસ્વરૂપસ્સ્વયમુરુનયને ગોરથે માર્ગણો યઃ ।
સ્થિત્વા બ્રહ્મોત્સવેષુ ત્રિષુ ચ નટપતિઃ પ્રત્યહં વીથિયાત્રાં
કૃત્વા સ્નાત્વા સદસ્સ્વં પ્રવિશતિ શિવયા કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥

ક્રોડેન શ્રીશનામ્ના ચરણસરસિજં યસ્ય શમ્ભોર્ન દૃષ્ટં
હંસેન બ્રહ્મનામ્ના ન મકુટશિખરં યસ્ય દૃષ્ટં કિલાસીત્ ।
ઓઙ્કારે નિત્યવાસં ત્રિદલસુમવરૈરર્ચ્યમાનાઙ્ઘ્રિયુગ્મં

હંસં હંસૈરુપાસ્યં હરિહરવપુષં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૭॥

પૂર્વં જ્ઞાનોપદેશં મણિમયવચસે કુન્દવૃક્ષસ્ય મૂલે
કૃત્વા સાદિત્વમાપ્ત્વા નૃપતિકરલસત્સ્વર્ણવેત્રપ્રહારમ્ ।
લબ્ધ્વા તેનોક્તગાનૈર્મધુરસભરિતૈસ્તૃપ્તિમાપ્તવાઽથ તસ્મૈ
મુક્તિં પ્રાદાદ્ય ઈશસ્તમખિલસુહૃદં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૮॥

દેવો યઃ પુલ્કસાય દ્વિજકુલજનુષે વલ્કલસ્યાત્મજાય
નન્દાભિખ્યાય મુક્તિં કણતૃણસુધિયે દત્તવાન્ભક્તિવશ્યઃ ।
નિત્યત્વં વ્યાઘ્રપાદપ્રથિતફણિપતિસ્તોત્રકૃજ્જૈમિનિભ્યઃ
તાંસ્તાન્કામાંશ્ચ સર્વાન્ તમજરમમરં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૯॥

આહૃત્ય બ્રહ્મશીર્ષં સકલજનિમતાં દર્શનાય સ્વદક્ષે
પાર્શ્વે સંસ્થાપ્ય પૂર્વં શ્રુતિવદનવિધિં વામતોઽસ્થાપયદ્યઃ ।
અદ્યારભ્યાત્મયોને મદુપહૃતહવિશ્શેષભુક્ત્વં ભવેતિ
સ્વાજ્ઞાપ્યાકાશરૂપસ્તમપિ નટપતિં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૩૦॥

પાર્થાય સ્વાસ્ત્રદાનં પશુપતિરકરોદ્યઃ પુરારાજતાદ્રૌ
યુદ્ધં તેનૈવ કૃત્વા વનચરતનુભાગ્ભિન્નશીર્ષસ્તથાસીત્ ।
ભીમસ્વાન્તાર્ચનાઢ્યૈસ્ત્રિદલસુમવરૈશ્છન્નગાત્રો નિતાન્તં
જાતસ્તં ચિત્સભેશં નિખિલતનુગતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૩૧॥

આસીન્મેરુશ્શરાસો ધરણિરપિ રથો જ્યાઽભવત્સર્પરાજોઽ-
પ્યાસ્તાં ચક્રેઽર્કસોમૌ સરસિજનિલયસ્સારથિર્યસ્ય શમ્ભોઃ ।
આસન્નશ્વાશ્ચ વેદો જલનિધિશરધેસ્ત્રૈપુરં હન્તુમિચ્છોઃ
હેતું તં લોકસૃષ્ટિસ્થિતિલયકરણે કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૩૨॥

ક્ષીરાબ્ધેર્મન્દરાદ્રિ પ્રમથનસમયેઽપ્યુત્થિતે કાલકૂટે
ગચ્છત્સુ પ્રાપ્ય ભીતિં નિખિલસુર કુલેષ્વપ્યનાદિઃ પુરસ્તાત્ ।
આવિર્ભૂય પ્રભુર્યસ્સકલસુરગણાન્ પ્રાશ્ય તં કાલકૂટં
સદ્યોઽરક્ષત્તમીશં તુહિનગિરિનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૩૩॥

કૃત્વા જમ્બૂફલાભં વિષમખિલજગદ્ભક્ષણે જાગરૂકં
સ્વાસ્યે પ્રક્ષેપમાત્રાન્નિજજઠરવસત્પ્રાણિસૌખ્યાય દેવી ।
કણ્ઠં સઙ્ગૃહ્ય હસ્તાત્પ્રિયમુખકમલં વીક્ષમાણા કિલાસીત્
તાં દૃષ્ટ્વાઽન્વગ્રહીદ્યસ્તમખિલવરદં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૩૪॥

માર્કણ્ડેયે પુરા શ્રીરજતગિરિપતેર્લિઙ્ગપૂજાપ્રવૃત્તે
    પાશૈઃ કર્ષત્યથાર્કૌ ભયકરવદને લિઙ્ગમધ્યાન્મહેશઃ ।
આગત્યારક્ષદેતં મુનિમથ શમનં મારયામાસ દેવો
    યસ્તં નિત્યં નટેશં નિખિલનૃપનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૩૫॥

સૃષ્ટ્વા બ્રહ્માણમાદૌ શ્રુતિગણમખિલં દત્તવાન્યો મહેશઃ
    તસ્મૈ નિર્માલ્યભુક્ત્વં સ્વસદસિ વિલસત્પઞ્ચપીઠાધરત્વમ્ ।
સૂતત્વં સ્વસ્ય મૂર્ધસ્થિતમકુટવરપ્રેક્ષણે હંસભાવં
    તં દેવં ચિત્સભાયાં સ્થિતિજુષમમલં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૩૬॥

યો મારઃ પ્રેષિતોઽભૂત્સ્વસવિધમસુરોત્સારિતૈસ્સ્વર્ગિભિઃ સ્વં
    યોગારૂઢાત્સમાધેશ્ચલયિતુમચલે રાજતેઽનન્યદૃષ્ટિમ્ ।
તં મારં ભાલનેત્રજ્વલનહતતનું યોઽકરોદ્દક્ષિણાસ્યઃ
    સેવાહેવાકલક્ષ્મીપતિમુખનિબિડં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૩૭॥

વિષ્ણુર્બ્રહ્મા રમેન્દ્રો દહનપિતૃપતી રાક્ષસાનામધીશઃ
    પાશી વાયુઃ કુબેરઃ ત્રિદૃગરુણમુખા દેવતાશ્ચન્દ્રસૂર્યૌ ।
નિત્યં યત્ક્ષેત્રરાજે પશુપતિ નટનં દૃષ્ટવન્તઃ સ્વનામ્ના
    લિઙ્ગાન્ સંસ્થાપ્ય નત્વા સુખવરમભજન્કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૩૮॥

સીતાજાનિઃ પુરસ્તાદ્દ્વિધિકુલજનુષં રાવણં સાઙ્ગમેકો
    હત્વા તદ્દોષશાન્ત્યૈ નલમુખકપિભિઃ નિર્મિતે રામસેતૌ ।
લિઙ્ગં સંસ્થાપ્ય યસ્યાનવરતયજનાત્પ્રાપ્તવાનિષ્ટસિદ્ધિં
    તં શમ્ભું વેદવેદ્યં પ્રણતભવહરં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૩૯॥

મોહિન્યા શમ્ભુરાદાવતિ નિબિડ વને દારુકાખ્યે ચરન્યઃ
    સૌન્દર્યાદ્દ્વિપ્રદારાન્મુનિગણમપિ તં માયયા મોહયિત્વા ।
વ્યર્થીકૃત્યાભિચારં દ્વિજકુલવિહિતં સમ્પ્રદર્શ્યાત્મનૃત્તં
    વિપ્રાંશ્ચાન્વગ્રહીદ્યસ્તમપિ ગિરિશયં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૪૦॥

પૂર્વં વાલ્કલ્યભિખ્યાન્નિહતતનુવરો દેવરાડ્વિષ્ણુમાપ્ત્વા
    ચોક્ત્વા સ્વોદન્તમસ્મૈ સહ મુરરિપુણા પ્રાપ્ય યત્ક્ષેત્રમીશમ્ ।
આરાધ્યાપ્ત્વા સુવીર્યં યદનઘકૃપયા મારયામાસ શત્રું
    તં દેવં ચિત્સભેશં વરરુચિવિનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૪૧॥

યદ્ક્ષેઽદ્યાપિ વિષ્ણુર્મણિમયસદને દક્ષિણે સ્વાઙ્ઘ્રિયુગ્મં
    કૃત્વાસ્યં ચોત્તરસ્યાં શરમુખફણિરાડ્ભોગતલ્પેશયાનઃ ।

નિત્યં નિદ્રાં પ્રકુર્વન્નપિ હૃદિ સતતં યત્પદં ધ્યાયતીડ્યં
　　દેવ્યા તં ચિત્સભેશં સુતગજવદનં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૪૨॥

સમ્બન્ધસ્સુન્દરઃ શ્રીમણિમયવચનો જિહ્વિકારાજનામા
　　ચત્વારોઽપ્યાત્મગાનૈર્વિવિધરસભરૈસ્સ્તોત્રરૂપૈર્યમીશમ્ ।
સ્તુત્વા તત્તત્સ્થલાન્તઃ સ્થિતિજુષમપિ યં ચૈકમદ્વૈતમૂર્તિં
　　પ્રાપુર્મુક્તિં તમાદ્યં કૃતવિધુમકુટં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૪૩॥

કૈલાસાદ્રૌ વટદ્રોર્નિકટમધિગતો દક્ષિણામૂર્તિરૂપઃ
　　તર્જન્યઙ્ગુષ્ઠયોગાત્સનકમુખમહાયોગિનાં જ્ઞાનદાતા ।
મૌનેન શ્રીકુમારં નિટિલનયનતો દગ્ધદેહઞ્ચ કૃત્વા
　　યશ્ચાસ્વાદ્રીન્દ્રકન્યાં સુતવરમસૃજત્કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૪૪॥

શૂરાદિધ્વંસનાર્થં સુતકરકમલે દત્તવાન્શક્તિમાદૌ
　　સર્વાસ્ત્રઞ્ચોપદિશ્ય પ્રબલસુરરિપૂન્કાલસામીપ્યભાજઃ ।
કૃત્વોદૂહ્યેન્દ્રકન્યાં વનચરતનુજાં ગેહમાયાહિ તાતે-
　　ત્યુક્ત્વા ચાન્વગ્રહીદ્યો ગુહમપિ મુદિતઃ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૪૫॥

કાલ્યા સાકં પુરા યસ્સુરમુનિસદસિ સ્વાઙ્ઘ્રિમુદ્યમ્ય ચોર્ધ્વં
　　નૃત્તં કૃત્વાઽથ કાલીં પશુપતિરજયત્તદ્બહિષ્કારપૂર્વમ્ ।
સર્વે દેવા મુનીન્દ્રાઃ પ્રભુરિતિ ચ વદન્ત્યૂર્ધ્વનૃત્તેશમૂર્તિં
　　યં દેવં પૂજયન્તિ પ્રતિદિનમનઘાઃ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૪૬॥

અન્તર્વેદ્યાં સ્વયજ્ઞે દિવિષદધિપતૌ સામગાનૈસ્તથોચ્ચૈઃ
　　આહૂતેઽનાગતેઽસ્મિન્ચદમલનટનં દૃષ્ટવન્તં સુરેન્દ્રમ્ ।
સદ્યો બુધ્વાઽઽત્મભૂસ્તં સ્વયમતિતરસાઽઽનીય યસ્યાતિદેશાત્
　　વિપ્રૈસ્સાકં સ્વયજ્ઞં સુરનુતમકરોત્કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૪૭॥

યશ્શમ્ભુઃ કાલહન્તા જલધરમસુરં સ્વાઙ્ઘ્રિ ચક્રેણ હત્વા
　　તદ્દુષ્કૃત્યાસ્ત્રશસ્ત્રૈઃ વિનિહતવપુષસ્સર્વલોકાનરક્ષત્ ।
યં સ્વક્રોધસ્વરૂપં જલધરમસુરં નાશયન્તં વરેણ્યં
　　સર્વે લોકા વદન્તિ પ્રમથપતિનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૪૮॥

કૈલાસાદ્રૌ કદાચિત્પશુપતિનયનાન્યદ્રિજાતાપિધાય
　　ક્રીડાં ચક્રેઽન્ધકારાત્સુરરિપુરુદભૂદન્ધકાખ્યોઽતિદુષ્ટઃ ।
તદ્ દુષ્કૃત્યં જગત્યાં પ્રસૃમરમસહૈસ્સર્વલોકૈઃ સ્તુતો યઃ
　　તં હત્વાઽરક્ષદેતાંસ્તમજહરિનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૪૯॥

હાલાસ્યે મીનનેત્રાપરિણયસમયે દર્શનાયાગતાભ્યાં
    સર્પેન્દ્રવ્યાઘ્રપદ્ભ્યાં રજતસદસિ યસ્સ્વાઙ્ઘ્રિમુદ્ધૃત્ય વામમ્ ।
નૃત્તં કૃત્વા મુનીન્દ્રાવિતરમુનિસુરાંસ્તોષપાથોધિમગ્નાન્
    ચક્રે તં સુન્દરાઙ્ગં મધુરિપુવિનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૫૦॥

માઘે માસે મખર્ક્ષે વરુણવિરચિત બ્રહ્મહત્યાવિમુક્ત્યૈ
    પ્રીત્યા યસ્સન્નિધાય સ્વયમુરુમકરૈઃ પૂરિતેઽબ્ધૌ જલેશમ્ ।
સ્નાનાન્મુક્તસ્વપાપં નિખિલમપિ જનં કારયામાસ પૂર્વં
    તં દેવં ચિત્સભાયાં અનવરતનટં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૫૧॥

દક્ષે યજ્ઞે પ્રવૃત્તે પરમશિવમનાદૃત્ય તત્કન્યકાયાં
    ગત્વા તત્ર સ્વતાતં નતવદનમુપેક્ષ્યૈન્દ્રમગ્નિં વિશન્ત્યામ્ ।
ગૌર્યાં કોપાદ્ય ઈશો દશશતવદનં વીરમુત્પાદ્ય કાલીં
    તાભ્યાં દક્ષાદિનાશં વ્યરચયદતુલં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૫૨॥

પાર્થો યલ્લિઙ્ગબુદ્ધ્યા યદુકુલતિલકં પૂજયામાસ પૂર્વં
    તન્નિર્માલ્યં સમસ્તં રજતગિરિનિષચ્છઙ્કરાઙ્ઘ્રૌ પ્રદૃષ્ટ્વા ।
ભીમસ્વાન્તાર્ચિતં ચ સ્વસખમપિ ગુરું પૃષ્ટવાન્તચ્ચરિત્રં
    તં દેવં ચિત્સભાયાં કૃતનટનવરં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૫૩॥

કૃષ્ણો યલ્લિઙ્ગપૂજામનુદિનમકરોદ્યામુને વામતીરે
    તન્નિર્માલ્યં ગૃહીત્વા યજતિ પરશિવં ચોપમન્યૌ મુનીન્દ્રે ।
જ્ઞાત્વૈતદ્વૃત્તમારાત્તદમલકરવાગ્દૃષ્ટિભિર્દીક્ષિતોઽભૂત્
    તત્પૂજાલિઙ્ગમૂલં તમનઘનટનં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૫૪॥

ઓઙ્કારાર્થં ષડાસ્યે રજતગિરિવરે પૃચ્છતિ બ્રહ્મદેવં
    ચોઙ્કારાર્થોઽહમસ્મીત્યનુવદતિ વિધૌ શિક્ષયામાસ તં યઃ ।
તદ્વક્તાદર્થમેનં સ્વયમપિ કુતુકાચ્છ્રોતુમત્યાદરેણ
    સ્વાઙ્કે સંસ્થાપ્ય સૂનું પ્રમુદિતમકરોત્ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૫૫॥

વૈકુણ્ઠો નિત્યમાદૌ પશુપતિમનઘૈઃ પુણ્ડરીકૈસ્સહસ્રે-
    ણાર્ચાં કુર્વન્ કદાચિન્ન ચરમકમલં દૃષ્ટમાસીત્તદૈવ ।
ઉત્પાટ્ય સ્વાક્ષિપદ્મં યદમલપદયોરર્પયિત્વાઽથ યસ્માત્
    ચક્રં સમ્પ્રાપ્ય રેજે તમપિ નટપતિં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૫૬॥

કૈલાસોદ્યાનદેશં સહ ગિરિસુતયાઽઽસ્વૈકદા ચન્દ્રચૂડઃ

સદ્યસ્તત્રેન્દિરાગાધરભુવિ નિવસન્યઃ કપીશાર્ચિતોઽભૂત્ ।
યસ્તસ્મૈ સાર્વભૌમત્વપદમપિ દદાવસ્ત્રશસ્ત્રાવલિઞ્ચ
તં દેવં પારિજાતાદ્યખિલસુમધરં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૫૭॥

સ્વર્ગાધીશઃ કદાચિત્કપિવદનનૃપાન્નાશયિત્વા સ્વશત્રૂન્
દત્વાઽસ્મૈ ત્યાગરાજં ષડપિ તદિતરાન્પ્રેષયામાસ રાજ્ઞે ।
સોઽપ્યાધારાદિ સપ્તસ્થલવરસદનેષ્વગ્રજૈરર્ચતે સ્મ
તન્મૂર્તીનાં ચ મૂલં મુનિગણવિનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૫૮॥

વાસિષ્ઠાદ્યા મુનીન્દ્રાઃ પ્રતિદિનમયુતં પઞ્ચવર્ણં જપન્તો
યત્ક્ષેત્રે વત્સરાન્તે હવનમપિ તથા તર્પણં બ્રહ્મભુક્તિમ્ ।
કૃત્વા સ્વાભીષ્ટમાપુર્નટપતિપુરતસ્તત્સપર્યાં વિધાય
પ્રેમ્ણા તં ચિત્સભેશં વિધિમુખવિનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૫૯॥

કઞ્ચિદ્દેવં સભાયાં સકલમુનિવરૈરર્ચ્યમાનાઙ્ઘ્રિપદ્મં
ઇચ્છાદેવ્યા સ્વશક્ત્યા મિલિતમનુપમં સચ્ચિદાનન્દનૃત્તમ્ ।
વામે ભિત્ત્યર્ધવામે સ્થિતયુગભુજયા જ્ઞાનશક્ત્યા ચ દૃષ્ટં
સર્વેષાં ભક્તિભાજાં નિખિલસુખકરં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૬૦॥

લક્ષ્મીપુષ્પં તથાર્કં બકગરુતમધઃ કૃષ્ણધુત્તૂર પુષ્પં
ગઙ્ગાચન્દ્રૌ જટાશ્ચ સ્વશિરસિ સતતં કર્ણયોર્ગાયકૌ દ્વૌ ।
હસ્તેષ્વહ્યગ્નિઢક્કાઃ પદકમલયુગે રત્નમઞ્જીરભૂષા
ધૃત્વા યસ્સામ્બરૂપસ્સદસિ જયતિ તં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૬૧॥

ભૂષારૂપૈઃ ફણીન્દ્રૈર્દ્વિગુણિતમહસં પુષ્પહાસં પુરારિં
ભસ્માલિપ્તાઙ્ગમીશં ભવમયજલધેસ્તારકં ભક્તિભાજામ્ ।
ધર્માદીંસ્તાન્પુમર્થાન્દદતમનુદિનં દક્ષિણાસ્યં સ્વભક્તૈઃ
ભાષારૂપૈશ્ચ ગાનૈઃ કૃતનુતિમમિતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૬૨॥

યસ્યોર્ધ્વે દક્ષપાણૌ વિનિહિતડમરોર્માતૃકાવર્ણરૂપં
ત્રૈચત્વારિંશદર્ણં ચતુરધિકદશાલઙ્કૃતં સૂત્રજાલમ્ ।
જાતં યત્તદ્ગૃહીત્વા પણનસુતમુખાઃ શબ્દશાસ્ત્રાદિગર્ભં
તત્તચ્છાસ્ત્રાણ્યકુર્વન્દરહસિતમુખં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૬૩॥

વામે કૃત્વા શિખીન્દ્રં ડમરુમપિ કરે દક્ષિણેઽભીતિમુદ્રાં
યોઽન્યસ્મિન્વામપાદં સરસિજસદૃશં કુઞ્ચિતં ડોલહસ્તાત્ ।
ભુક્તેર્મુક્તેશ્ચ દાને નિપુણમિદમિતિ પ્રાણિનાં દર્શયિત્વા

નૃત્યન્તં ચિત્સભાયાં શ્રુતિશિખરનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૬૪॥

મૂલાધારાદિષટ્કેઽપ્યનવરતનટં યં વિરાજો હૃદબ્જે
સર્પેન્દ્રવ્યાઘ્રપાદપ્રમુખમુનિનુતં ષટ્સુ કાલેષુ વેદૈઃ ।
આરાધ્યાભીષ્ટસિદ્ધિં દ્વિજકુલતિલકાઃ પ્રાપ્નુવન્તિ પ્રભું તં
ચિચ્છક્ત્યા યુક્તમાદ્યં કનકગિરિકરં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૬૫॥

વેદાન્તોક્તાત્મરૂપં વિધિહરિતનુજં વિશ્વનાથં સદસ્સ્થં
સ્વધ્યાનાન્નાશયન્તં સકલભુવનગં મોહમપ્યન્ધકારમ્ ।
ચન્દ્રોત્તંસં સ્મિતાસ્યં સિતભસિતલસત્ભાલદેશં ત્રિનેત્રં
વિશ્વૈર્દેવૈર્નતાઙ્ઘ્રિં વિવિધતનુગતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૬૬॥

ચક્ષૂંષ્યર્કાગ્નિચન્દ્રાશ્ચરણમહિભુવિ વ્યોમ્નિ કેશાશ્ચ યસ્યા-
પ્યષ્ટાવાશાશ્ચ વસ્ત્રં નિખિલભુવન સંલગ્નહસ્તોઽદ્વિતીયઃ ।
કુક્ષિર્વારાશિજાલં નટનશુભતલં રુદ્રભૂમિશ્ચ નિત્યં
તં દેવં ચિત્સભેશં શ્રુતિગણવિનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૬૭॥

દીર્ઘાયુઃ પુત્રપૌત્રાન્ધનગૃહવસુધાવસ્ત્રભૂષાગજાશ્વાન્
વિદ્યારોગ્યેશભક્તીર્જલજસમમુખીસ્સુન્દરીઃ ભૃત્યવર્ગાન્ ।
મુક્તિં યન્નૃત્તમૂર્તેશ્ચરણસરસિજં પૂજયન્તો લભન્તે
તં દેવં ચિત્સભેશં સકરુણહૃદયં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૬૮॥

નિત્યાર્ચાસ્વન્વહં યઃ પ્રદિશતિ નિતરાં ભુક્તયે કાઞ્ચનાદીન્
વિપ્રાણાં સમપાકાન્હવિરપિ સકલં સૌમિકાસ્સમસંસ્થાઃ ।
કૃત્વા નૃત્તેશપૂજાં શ્રુતિવિહિતપથા કુર્વતાં શ્રીસભેશઃ
તં દેવં નૃત્ત મૂર્તિં મણિમયપદકં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૬૯॥

ભૂતે સંસ્થાપ્ય ચૈકં ચરણસરસિજં દક્ષિણં વામપાદં
શિઞ્જન્મઞ્જીરશોભં વિધિમુખદિવિષત્પૂજિતં ભક્તિભાજામ્ ।
ધર્માદીષ્ટાન્પ્રદાતું ધનલિપિસહિતં કિઞ્ચિદુદ્ધૃત્ય તિર્યક્
ચાકુઞ્ચ્યાનન્દનૃત્તં કલયતિ વરદં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૭૦॥

યામ્યે શ્રીન્ પુરાખ્યા જનિભૃદઘહરા નિમ્નગા ભાતિ યસ્યો-
દીચ્યાં શ્વેતાભિધાના વરુણદિશિ મહાવીરભદ્રાખ્યવાપી ।
પ્રાચ્યામબ્ધિસ્સમીપે તદુદરવિલસત્તિલ્વકાન્તારનામ્નિ
ક્ષેત્રે યશ્ચિત્સભાયાં નટતિ સકલગં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૭૧॥

પઞ્ચપ્રાકારયુક્તે પ્રવિલસતિ પુરે પઙ્ક્તિતીર્થપ્રવીતે
　સર્વાશાવ્યાપ્તકીર્તિદ્વિજવરનિબિડે વ્યોમનામ્ન્યાત્મરૂપે ।
મધ્યે શ્રીચિત્સભાયાં કલયતિ નટનં સર્વદા સામ્બિકો યઃ
　તં દેવં વેદમૂર્ધસ્થિતિજુષમનઘં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૭૨॥

ભાસન્તે નૈવ યસ્મિન્ રવિશશિહુતભુક્તારકાશ્ચાપિ વિદ્યુત્
　યસ્માદ્ભીત્યેન્દ્રવાયૂ મિહિરકિરણજો દૂરતો યાન્તિ નિત્યમ્ ।
યદ્રૂપં યોગિવર્યા હૃદયસરસિજે ચિન્તયન્ત્યન્વહં તં
　શ્રીમન્તં ચિત્રરૂપં વસુકરકમલં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૭૩॥

ષટ્કાલાર્ચાસુ નિત્યં સ્ફટિકમણિમયે લિઙ્ગનૃત્તેશમૂર્તૌ
　શુદ્ધૈસ્તીર્થૈઃ કદાચિત્સ્વમપિ નટપતિં ચાભિષેક્તું સમન્ત્રમ્ ।
મૂર્ધાલઙ્કારભૂતા પ્રવહતિ પરમાનન્દકૂપે યદુક્ત્યા
　ગઙ્ગા તં ચિત્સભેશં સુરવરવિનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૭૪॥

સ્તમ્ભાકારૈઃ પુરાણૈર્ધૃતકનકસભા ભાતિ યસ્યાગ્રભાગે
　યસ્યાં ધર્મસ્વરૂપો વૃષભપતિરુદગ્વક્ત્રપદ્મો વિભાતિ ।
યસ્યામીશસ્ય દેવ્યાઃ સ્ફટિકવટુકયો રત્નમૂર્તેઃ મુનીન્દ્રાઃ
　કુર્વન્ત્યદ્ભિઃ પ્રપૂજાં તમપિ નટવરં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૭૫॥

યદ્ગેહં પઞ્ચસાલૈર્દિશિ દિશિ વિલસદ્ગોપુરૈર્વેદસઙ્ખ્યૈઃ
　અન્નાદિ બ્રહ્મકોશત્વમુપગતસભાપઞ્ચકૈર્ભાતિ તીર્થૈઃ ।
શ્રીમૂલસ્થાનદેવીહરિગજવદનસ્કન્દગેહૈશ્ચ નિત્યં
　તત્રત્યાનન્દકોશે વિરચિતનટનં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૭૬॥

ગઙ્ગાતીરસ્ય પશ્ચાદ્વિલસતિ સદને સચ્ચિદાનન્દરૂપા
　દેવી યા સર્વવિદ્યાલયમુખકમલા ભાસતે વેદહસ્તા ।
યા યસ્ય જ્ઞાનશક્તિશ્શિવપદસહિતા કામસુન્દર્યભિખ્યા
　તદ્દેવ્યા દૃષ્ટનૃત્તં શ્રુતિનિહિતપદં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૭૭॥

બ્રહ્મૈવાખણ્ડમેતન્નટનપતિતનું પ્રાપ્ય વક્ત્રાત્ દ્વિજેન્દ્રાન્
　બાહુભ્યઃ ક્ષત્રવર્ગાન્ સકલપશુતતેઃ પાલનાયોરુયુગ્માત્ ।
વૈશ્યાન્પદ્ભ્યાં ચ શૂદ્રાનવિકલમસૃજલ્લીલયા દેવરાડ્યઃ
　તં દેવં ચિત્સભેશં શ્રુતિવિનુતકથં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૭૮॥

સ્વસ્યાં શ્રીચિત્સભાયાં નટનમતિમુદા કર્તુમુદ્યુક્તવાન્ યો
　દેવેન્દ્રે વેણુહસ્તે મુરજકરયુગે શ્રીપતૌ તાલહસ્તે ।

બ્રહ્મણ્યાનન્દભાજો જિમિનસુતફણિવ્યાઘ્રપાદાસ્તદાનીં
    જાતાસ્તં બ્રહ્મરૂપં સગુણમતિગુણં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૭૯॥

વિષ્ણોર્મઞ્ચઃ કદાચિચ્છરવદનયુતશ્રીપતઞ્જલ્યભિખ્યઃ
    ચાત્રેઃ પુત્રત્વમાપ્વા શિવપણનજયોસ્સૂત્રભઙ્ગીં સમીક્ષ્ય ।
શમ્ભોર્યસ્ય પ્રસાદાદરચયદતુલં શ્રીમહાભાષ્યસંજ્ઞં
    ગ્રન્થં યત્ક્ષેત્રરાજે તમલિકનયનં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૮૦॥

પઞ્ચાશદ્વર્ણયુક્તૈર્મનુભિરભિમતં કાઙ્ક્ષિણાં દેહભાજાં
    સ્વક્ષેત્રાભિખ્યમન્ત્રૈરપિ વિતતમહાપઞ્ચ પઞ્ચપ્રયોગૈઃ ।
યુક્તૈર્ગાયત્રિસઙ્ખ્યૈર્ધ્વનિમનુભિરથાભીષ્ટસિદ્ધિપ્રદો યઃ
    તં તત્ત્વાતીતમાદ્યં કનકકવચિનં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૮૧॥

યસ્ય સ્વાન્તામ્બુજાતાદુડુપતિરુદભૂચ્ચક્ષુષશ્ચણ્ડરશ્મિઃ
    વક્ત્રામ્ભોજાચ્ચ વહ્નિર્દિવિષદધિપતિઃ પ્રાણતો ગન્ધવાહઃ ।
યન્નાભેરન્તરિક્ષં ચરણસરસિજાત્કુમ્ભિની દ્યૌશ્ચ શીર્ષ્ણઃ
    કાષ્ઠાશ્ચ શ્રોત્રયુગ્માત્તમપિ પરશિવં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૮૨॥

વિદ્યાં વામેક્ષણેન્દોઃ શ્રિયમપિ કલયન્ દક્ષનેત્રાબ્જબન્ધોઃ
    ફાલેક્ષાચ્ચિત્રભાનોઃ સકલજનિમતાં પાપતૂલં ચ દગ્ધ્વા ।
સ્વસ્યાઙ્ઘ્ર્યાલોકમાત્રાદુપનિષદુદિતબ્રહ્મબોધં પ્રયચ્છન્
    યસ્સર્વાન્ રક્ષતીશસ્તમુડુપતિધરં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૮૩॥

કૈલાસે ભોગપુર્યાં સકલજનિમતાં હેતુરાસ્તે શિવો યઃ
    સર્વક્ષેત્રેષુ ગૂઢો વિલસતિ સતતં સ્વાંશસાદાખ્યરૂપઃ ।
સોઽપ્યેવાંશી ધરણ્યા હૃદયસરસિજે ચિત્સભાન્તસ્થભિત્તૌ
    કુર્વન્નૃત્તં મુદાઽણ્ડાનવતિ તમનઘં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૮૪॥

યદ્ભાસા ભાતિ નિત્યં સકલમપિ જગત્તત્પરં જ્યોતિરેવ
    વૈરાજે હૃત્સરોજે કનકસદસિ વૈ સામ્બનૃત્તેશમૂર્તિઃ ।
ભૂત્વા નૃત્તં કરોતિ પ્રભુરપિ જગતાં રક્ષણે જાગરૂકઃ
    તં દેવં ચિત્સભેશં વિધૃતસુમસૃણિં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૮૫॥

આત્મૈવ શ્રીનટેશો ધરણિરવિજલાન્યગ્નિવાયૂ વિહાય-
    શ્ચન્દ્રો યજ્વા ચ ભૂત્વાઽવતિ જગદખિલં પઞ્ચવિંશેશભિન્નઃ ।
તત્ત્વાતીતો મહેશોઽપ્યુરુરણુરખિલાભ્યન્તરે રાજતે યઃ
    તં સોમં સોમમિત્રં સુમુખગુહસુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૮૬॥

યદ્બ્રહ્મોચ્છ્વાસરૂપા શ્રુતિરપિ સકલા તત્સમાના સ્મૃતિશ્ચ
    કલ્પા ગાથાઃ પુરાણં વિવિધમનુવરાસ્સેતિહાસાશ્ચ વિદ્યાઃ ।
સર્વત્રાદ્યાપિ ભાન્તિ સ્વયમપિ કૃપયા યત્સભાયાં નટેશો
    ભૂત્વા લોકાન્સમસ્તાનવતિ તમસમં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૮૭॥

વેદાન્તે વાક્યરૂપા ઉપનિષદ ઇમા બ્રહ્મસામીપ્યભાજઃ
    તાસાં મુખ્યા દશસ્યુર્યતિવિરચિતમહાભાષ્યયુક્તા મહત્યઃ ।
સ્તમ્ભાકારાઃ સ્તુવન્તિ સ્વવિદિતનટનં સર્વદા બ્રહ્મરૂપં
    તં દેવં ચિત્સભેશં પરમતિમહસં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૮૮॥

શાબ્દે શાસ્ત્રે ફણીન્દ્રૈઃ પ્રમિતિ ફણિતિષુ શ્રીકણાદાક્ષપાદૈઃ
    વેદાન્તે વ્યાસરૂપૈર્જૈમિનસુતકૃતૌ ભટ્ટકૌમારતુલ્યૈઃ ।
કલ્પે બોધાયનૈસ્તૈશ્શ્રુતિષુ વિધિસમૈઃ પૂજ્યતે યો મુનીન્દ્રૈઃ
    ત્રૈસાહસ્રૈસ્સભાયાં તમપિ ગુરુવરં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૮૯॥

કઞ્જાક્ષ્યા સ્વસ્ય શક્ત્યા સહકૃતનટનં કસ્ય શીર્ષચ્છિદં તં
    કાલં કામં પુરાણિ સ્વપદસરસિજાત્ભાલનેત્રાસ્મિતાશ્ચ ।
હત્વા બ્રહ્મર્ષિસૂનું સકલદિવિષદશ્ચાપિ રક્ષન્તમીશં
    દેવેડ્યં ચિત્સભેશં દશશતવદનં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૯૦॥

યલ્લિઙ્ગે બ્રહ્મવિષ્ણુપ્રમુખસુરવરા ભસ્મરુદ્રાક્ષભાજઃ
    સસ્ત્રીકાસ્સામ્બમૂર્તિં સકલતનુભૃતાં સર્વદં સર્વરૂપમ્ ।
અભ્યર્ચ્યાસ્વેષ્ટસિદ્ધિં દિવિ ભુવિ સકલૈસ્સેવ્યમાના બભૂવુઃ
    તં દેવં ચિત્સભેશં વિધિહુતહવિષં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૯૧॥

શ્રદ્ધાવન્તઃ શ્રુતિજ્ઞાઃ પરશિવકૃપયાઽધીતશાસ્ત્રાદિવિદ્યાઃ
    વ્યર્થાં વાચં ત્યજન્તઃ પ્રતિદિનમસકૃત્પૂજયન્તઃ પ્રભું યમ્ ।
કુર્વન્તઃ શ્રૌતકર્માણ્યનિતરસુલભાન્યાત્મબોધં લભન્તે
    વિપ્રેન્દ્રાઃ સ્વાંશભૂતાઃ પરશુમૃગધરં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૯૨॥

ફાલે ભસ્મત્રિપુણ્ડ્રં ફણિનમપિ ગલે પાદપીઠે ચ ભૂતં
    બાહ્વોર્વહ્નિઞ્ચ ઢક્કાં વદનસરસિજે સૂર્યચન્દ્રૌ શિખીન્દ્રમ્ ।
ઓઙ્કારાખ્યપ્રભાયાં સુરભુવનગણં પાર્શ્વયોર્વાદ્યકારૌ
    યઃ કૃત્વાઽઽનન્દનૃત્તં સ્વસદસિ કુરુતે કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૯૩॥

સર્વેષાં પ્રાણિનાં યસ્સ્વપદસરસિજં પૂજિતું પાણિયુગ્મં

સ્વં દ્રષ્ટું લોચને દ્વે સ્વચરિતમખિલં વક્તુમીશસ્સુવાચમ્ ।
સ્વસ્ય પ્રાદક્ષિણાર્થં ચરણયુગમપિ ધ્યાનયોગાય ચિત્તં
દત્વા રક્ષત્યજસ્રં તમુદકમકુટં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૯૪॥

નાહં કર્તા ચ ભોક્તા, ન ચ મમ સુકરં દુષ્કરં કર્મ કિઞ્ચિત્
ધર્માધર્મૌ ચ, દુઃખં સુખમપિ, કરણં નૈવ મત્તઃ પરોઽન્યઃ ।
સોઽહં બ્રહ્માસ્મિ નિત્યો, નહિ જનિમરણે, નિર્વૃતોઽહં સદેતિ
સ્વાન્તે પશ્યન્તિ બોધાદ્યમપિ યતિવરાઃ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૯૫॥

ગઙ્ગાપાથો વહન્તં ગજવદનનુતં ગન્ધવાહસ્વરૂપં
ગાયત્રીવલ્લભાખ્યં નગપતિતનુજાસ્વીકૃતાર્ધાઙ્ગમીશમ્ ।
ગોવિન્દાન્વેષિતાઙ્ઘ્રિં ગુરુવરવપુષં ગોપતેઃ પૃષ્ઠવાસં
ગૌરીનાથં ગુણીડ્યં ગિરિવરવસતિં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૯૬॥

પદ્માકારાસનસ્થં પરમસુરરિપું પઞ્ચવક્ત્રારવિન્દં
પાણ્ડોઃ પુત્રાર્ચિતાઙ્ઘ્રિં પવિધરવિનુતં પાર્વતીપ્રેમપાત્રમ્ ।
પક્ષીશં પીતરૂપં પરશુમુખધરં પઞ્ચવક્ત્રારિમાદ્યં
નૃત્યન્તં ચિત્સભાયાં નિટિલવરદૃશં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૯૭॥

ભીમસ્વાન્તાર્ચિતાઙ્ઘ્રિં ભુજગવરધરં ભોગમોક્ષૈકહેતું
ભક્તાનાં રક્ષિતારં ભવભયજલધેસ્તારકં ભાસમાનમ્ ।
ભૂષાભિર્ભર્ગમીશં ભિષજમુપનિષદ્વેદિનં ભૂતનાથં
બ્રહ્માનન્દસ્વરૂપં ભવમખિલતનું કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૯૮॥

શાટીપાલાખિલાશાપતિમુખવિનુતં શઙ્ખપાણ્યર્ચિતાઙ્ઘ્રિં
શમ્ભું શર્વં શિવેશં શશધરમકુટં શાક્કરેન્દ્રે વસન્તમ્ ।
શોણાદ્રીશં શુભાઙ્ગં શુકકરશિવયાઽઽલિઙ્ગિતં શ્રૌતગમ્યં
નૃત્યન્તં સ્વર્ણસંસદ્યખિલનતપદં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૯૯॥

કાઞ્ચ્યાં પૃથ્વીશલિઙ્ગં જનિમ જલમયં જમ્બુકેશેઽસ્તિ નિત્યં
શોણાદ્રૌ વહ્નિલિઙ્ગં વનચરપતિના પૂજિતં કાલહસ્તૌ ।
વાય્વીશં તિલ્વવન્યાં ત્રિશિખરમકુટે સંસ્થમાકાશલિઙ્ગં
યલ્લિઙ્ગં સર્વમેતત્તમપિ નટપતિં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૦૦॥

યસ્માત્સર્વં ચરં ચાચરમપિ સમુત્પન્નમાદૌ જગત્તત્
યેનેદં રક્ષિતઞ્ચ પ્રવિલયસમયે લીયતે યત્ર સર્વમ્ ।
તં દેવં ચિત્સભાયાં અનવરતનટં બ્રહ્મવિષ્ણ્વાદિપાર્શ્વં

તેજોરૂપં ત્રિકૂટસ્થિતિજુષમમલં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૦૧॥

સૃષ્ટ્યૈ બ્રહ્માણમાદૌ હરિમથ જગતાં રક્ષણાયાત્મરૂપઃ
સંહૃત્યૈ રુદ્રમૂર્તિં ત્વથ નિખિલતિરોધાનહેતોર્મહેશમ્ ।
તલ્લોકાનુગ્રહાર્થં હિમગિરિતનયાસક્તસાદાખ્યમૂર્તિં
યસ્સૃષ્ટ્વાઽઽનન્દનૃત્તં સદસિ વિતનુતે કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૦૨॥

ત્ર્યક્ષં ત્રૈલોક્યવાસં ત્રિપુરવિજયિનં ત્રૈગુણાતીતરૂપં
ત્રેતાગ્નિષ્વગ્નિમૂર્તિં ત્રિશિખરિશિખરે રાજમાનં ત્રિશક્તિમ્ ।
ત્રૈસાહસ્રદ્વિજાર્ચ્યં ત્રિસૃભિરપિ સદા મૂર્તિભિર્દૃષ્ટનૃત્તં
ત્રૈવિધ્યં ચિત્સભેશં નિગમમયતનું કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૦૩॥

ધર્મં દત્વા જનાનાં ડમરુકનિનદૈરર્થમપ્યગ્નિના યઃ
કામં દત્વાઽભયેન સ્વપદસરસિજાન્મોક્ષરૂપં પુમર્થમ્ ।
દત્વા લોકાન્ સમસ્તાનવતિ નટપતિઃ નાયકશ્ચિત્સભાયાઃ
તં દેવં નૃત્તમૂર્તિં વિસદૃશચરિતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૦૪॥

અન્ધઃકોશે વિધાતા ગરુડવરરથઃ પ્રાણકોશે ચ રુદ્રઃ
ચેતઃકોશે મહેશસ્તદનુ ચ વરવિજ્ઞાનકોશે સદાખ્યઃ ।
આનન્દાભિખ્ય કોશે લસતિ ચ સતતં યસ્ય શમ્ભોર્નિદેશાત્
તં દેવં રાજરાજેશ્વરવરસુહૃદં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૦૫॥

ધૃત્વા યઃ સર્વદેશઃ પદજલજમુખે શ્રેષ્ઠમુક્તાલિમઙ્ગે
સૌવર્ણં કઞ્ચુકઞ્ચ પ્રથિતમણિચિતં ભૂષણં દિવ્યવસ્ત્રમ્ ।
નૃત્તં કૃત્વાઽઽગતાનાં સકલતનુભૃતાં ધર્મમુખ્યાન્પુમર્થાન્
દત્વા રક્ષત્યનાદિર્મુનિકૃતયજનઃ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૦૬॥

શિષ્યાણાં વેદબાહ્યસ્થિતિમધિજુષતાં બોધનાર્થં પઠન્તઃ
ચર્યાયોગાઙ્ઘ્રિભેદપ્રકટિતવિભવાન્ કામિકાદ્યાગમાંસ્તાન્ ।
ભૂદેવા વાજપેયક્રતુગતનૃપતિપ્રોદ્ધૃતોદ્દામશુક્લ
છત્રા યં પૂજયન્તિ શ્રુતિપથવિધિના કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૦૭॥

વેદાન્તોદ્ગીતરૂપં જ્વલનડમરુકૌ ધારયન્તં કરાભ્યાં
અન્યાભ્યાં ડોલમુદ્રામભયમપિ સદાઽપસ્મૃતૌ દક્ષપાદમ્ ।
વિન્યસ્યાકુઞ્ચિતેન પ્રણમદખિલદં વામપાદેન નિત્યં
દેવ્યા સાકં સભાયાં રચયતિ નટનં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૦૮॥

આમન્વશ્રં સુદીપ્તાં નિજતનુમભિતસ્સત્યરૂપપ્રભાન્તઃ
　　વામે યુક્તં સ્વશક્ત્યા વસુદલકમલસ્વાર્ણકિઞ્જલ્કશોભમ્ ।
વ્યાપ્તં સાહસ્રકોષ્ઠસ્થિતશિવમનુભિર્મોહનાદ્યૈર્યદીયં
　　ચક્રં સમ્પૂજયન્તિ પ્રતિદિનમનઘાઃ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૦૯ ॥

ત્રૈચત્વારિંશદશ્રે વસુનૃપકમલે વૃત્તભૂચક્રમધ્યે
　　બિન્દૌ સન્તાનકલ્પદ્રુમનિકરયુતે રત્નસૌધે મનોજ્ઞે ।
બ્રહ્માદ્યાકારપાદે શિવમયફલકે સ્વર્ણમઞ્ચે નિષણ્ણો
　　દેવ્યા યઃ પૂજ્યતે તં હરિમુખવિબુધૈઃ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૧૦ ॥

યલ્લીલારબ્ધનૃત્ત પ્રસૃતવરજટાજૂટસમ્મર્દવેગ-
　　પ્રોદ્યત્સ્વર્ગાપગામ્ભોજનિતકણગણા યત્ર યત્ર પ્રપેતુઃ ।
તેઽપ્યાસંસ્તત્ર તત્ર સ્વજનિમમુખરા મૂર્તયઃ ક્ષેત્રરાજે
　　તં દેવં નન્દિમુખ્યપ્રમથગણવૃતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૧૧ ॥

શ્રીવિદ્યાષોડશાર્ણૈર્મિલિતમપિ તથા પઞ્ચવર્ણૈઃ કુમારી-
　　બીજૈર્યન્મન્ત્રરાજં મુહુરજકમલાનાથરુદ્રેશશર્વાઃ ।
જપ્ત્વા સંસૃષ્ટિરક્ષાલયસકલતિરોધાનકાનુગ્રહાદ્યાઃ
　　સિદ્ધીરાપુસ્તમીશં શુભકરનયનં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૧૨ ॥

યસ્યાહુર્નૃત્તમૂર્તેઃ શ્રુતિહૃદયવિદશ્શક્તિમેકામપીડ્યાં
　　કાલીં કોપે ચ દુર્ગાં યુધિ જગદવને વિષ્ણુરૂપાં ભવાનીમ્ ।
ભોગે જ્ઞાનક્રિયેચ્છામયવિવિધતનું સર્વસંહારકાલે
　　સ્વાન્તર્લીનાં પ્રસન્નાં તમિભમુખસુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૧૩ ॥

શ્રીહીરાલ્લબ્ધચિન્તામણિ મનુમનુસન્ધાય નિર્જીવદેહે
　　માતુર્મામલ્લદેવ્યા નિશિ વિગતભયો હર્ષનામોપવિશ્ય ।
વિપ્રઃ શ્રીરુદ્રભૂમૌ યદધિકકૃપયા માતરં સર્વવિદ્યાં
　　સિદ્ધીરન્યાશ્ચ લેભે કરધૃતડમરું કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૧૪ ॥

ગઙ્ગામાહર્તુકામે કપિલમુનિતપોવહ્નિસન્દગ્ધદેહાન્
　　સ્વર્ગં નેતું પિતૄન્સ્વાન્યજતિ રઘુપતૌ યઃ પુરસ્તાદુદેત્ય ।
ગર્વાદ્વ્યોમ્નઃ પતન્તીં સ્વશિરસિ કણિકાસન્નિભાં તાં નિરુધ્ય
　　સ્તુત્યા રાજ્ઞઃ પૃથિવ્યાં વ્યસૃજદનુપમં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૧૫ ॥

વંશ્યઃ કાકુત્સ્થરાજ્ઞો દશરથનૃપતિઃયસ્ય પુત્રપ્રદેષ્ટિં
　　ક્ષેત્રે કૃત્વા વસિષ્ઠપ્રમુખવચનતઃ સશ્રિયં પઞ્ચવર્ણમ્ ।

જપ્ત્વા વર્ષં વસિત્વા સદસિ નટપતેઃ દર્શનાદ્ગ્રામપૂર્વાન્
    વિષ્ણોરંશાન્સુપુત્રાનભજદઘહરં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૧૬॥

કુમ્ભોદ્ભૂતોપદેશાદ્વનભુવિ વિરજાહોમસમ્ભૂતભૂત્યાં
    આસીનં સોઢસીતાવિરહમપિ સદા વેદસારં સહસ્રમ્ ।
નામ્નામાવર્તયન્તં દશરથતનયં વીતશોકં વ્યતાનીત્
    ગીતાવાક્યૈર્ય ઈશઃ સ્વશરમપિ દદૌ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૧૭॥

ગન્ધર્વશ્ચિત્રસેનઃ સુરપતિવચનાત્તિલ્વકાન્તારમધ્યે
    નૃત્યન્તં ચિત્સભાયાં ગિરિવરતનયાપાઙ્ગદુગ્ધાબ્ધિચન્દ્રમ્ ।
શમ્ભું નત્વા મુહુર્યત્કરડમરુરવાધીતસઙ્ગીતવિદ્યા-
    સિદ્ધાન્તોઽભૂત્તમીશં સુરગણવિનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૧૮॥

યન્નૃત્તં દ્રષ્ટુકામા રવિશશિમુખરાઃ સ્વાભિધાનૈર્ગ્રહેશાઃ
    લિઙ્ગાન્સંસ્થાપ્ય ગઙ્ગાતટવરનિકટે પૂજયિત્વા સભાયામ્ ।
તેજોરૂપં ચ લાસ્યં બહિરિવ હૃદયે સન્તતં ચિન્તયન્તઃ
    વાસં ચક્રુસ્તમીશં નિખિલતનુમયં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૧૯॥

શ્રીવિદ્યાં સઞ્જપન્તો બહુદિનમસકૃદ્યે હયગ્રીવકુમ્ભો-
દ્ભૂતપ્રષ્ઠા મુનીન્દ્રાઃ પરશિવમહિષીં પાશકોદણ્ડ હસ્તામ્ ।
સાક્ષાત્કૃત્યાથ તદ્વાગમૃતજનિમયાદ્દેવમન્ત્રપ્રભાવાત્
નૃત્તં દૃષ્ટ્વાઽઽત્મબોધં સુખકરમભજન્ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥

ગીત્યાં સન્દિહ્યમાનઃ કલહરસિકહૃન્નારદાખ્યસ્સુરર્ષિઃ
    ધાતુર્વાક્યેન ગત્વા યદમલનિલયં મન્ત્રયોગાન્મહેશમ્ ।
પ્રત્યક્ષીકૃત્ય ઢક્કોદ્ભવસરિગમપાધાનિવર્ણાદ્વિષટ્કાન્
    બુધ્વા ગાયન્સવીણઃ સદસિ વસતિ તં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૨૧॥

પાઠીનાકારભાજં ફણિભુવનસમાનીતવેદાસુરઘ્નં
    પુચ્છાઘાતપ્રશાન્તામ્બુનિધિશિખિશિખં પર્વતેન્દ્રાનુકલ્પમ્ ।
વિષ્ણું દૃષ્ટ્વાઽતિભીત્યા વિબુધપરિબૃઢૈઃસ્તૂયમાનઃ કપાલી
    યસ્તં નિઘ્નન્જહાર દ્વિનયનમપિ તં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૨૨॥

ભીમં પીતામ્બુરાશિં કમઠવરતનું કાલકૂટોપમાગ્નિ-
    જ્વાલાસન્દિગ્ધવક્ત્રં જગદપિ નિખિલં ક્ષોભયન્તં સ્વકૃત્યૈઃ ।
બ્રહ્માદ્યૈરપ્યજય્યં હરિમધિવસુધં કર્ષયન્યસ્તદીયાન્
    અઙ્ગાન્ કણ્ઠે દધૌ તં નિખિલસુરનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૨૩॥

પોત્રીરૂપં મહાન્તં જલધિગતધરાં દંષ્ટ્રયોદ્ધૃત્ય વેગાત્
    યુદ્ધે હત્વા હિરણ્યં સુરરિપુમખિલાનિષ્ટકૃત્યૈશ્ચરન્તમ્ ।
વૈકુણ્ઠં ભૈરવો યશ્શિતશિખવિગલદ્વહ્નિકીલાસશૂલ-
    પ્રોતં કૃત્વા તદીયં રદમુરસિ દધૌ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૨૪॥

ભીત્યા સન્ત્રાસમાને નરહરિવપુષો દેવતાનાં સમૂહે
    ધાત્રા સંસ્તૂયમાનઃ શરભવરતનુઃ સાલુવઃ પક્ષિરાજઃ ।
વેગાત્તં છેદયિત્વા સ્વપદનખમુખૈસ્તત્ત્વચાઽલઙ્કૃતોઽભૂત્
    દંષ્ટ્રાસન્દીપ્તલોકસ્તમખિલવરદં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૨૫॥

યુદ્ધે ભગ્નોરુકાયં નરહરિવપુષં ગણ્ડભેરુણ્ડરૂપી-
    ભૂત્વા ગર્જન્તમગ્રે શરભખગપતિર્યઃ સ્વફાલાક્ષિકુણ્ડાત્ ।
ઉગ્રપ્રત્યઙ્ગિરાખ્યાં શતશતવદનાં કાલિકામાશુ સૃષ્ટ્વા
    તસ્યા જિહ્વાગ્રવહ્નિં સુચરુવદનયત્કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૨૬॥

યાઞ્ચાખવીકૃતાઙ્ગં બલિમખસદસિ સ્વાં તનૂં વર્ધયિત્વા
    દ્યાવાભૂમી સુરારેર્મકુટમપિ પદા માનયિત્વા ત્રિલોકીમ્ ।
હુઙ્કારાદ્ભીષયન્તં સુરગણવિનુતો વામનં યો વિનિઘ્નન્
    કઙ્કાલં તસ્ય દેહત્વચમપિ હૃતવાન્કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૨૭॥

શ્રીચક્રસ્યન્દનસ્થાં ગજતુરગસમારૂઢશક્ત્યગ્રભાગાં
    નિત્યાવારાહિમન્ત્રિણ્યનુચરસહિતાં દૃષ્ટબાલાસ્ત્રવિદ્યામ્ ।
સર્વાસ્ત્રાશ્લિષ્ટહસ્તાં રણભુવિ વિલસદ્યુદ્ધવેષાં ભવાનીં
    દૃષ્ટ્વા તુષ્ટોઽભવત્તં ધનપતિસુહૃદં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૨૮॥

વિષ્ણોરંશાવતારાન્દશ કરનખરૈઃ યુદ્ધરઙ્ગે સૃજન્તી
    કામેશાલોકનોદ્યદ્ગજવદનકરધ્વસ્તવિઘ્નેશયન્ત્રા ।
યસ્યાસ્ત્રેણાશુ ભણ્ડં સસુતગણપુરં નાશયામાસ દૈત્યં
    દેવી શ્રીચક્રસંસ્થા તમપિ શિવકરં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૨૯॥

દ્વાત્રિંશદ્રાગબોધચ્યુતમકુટશશિસ્વચ્છપીયૂષધારા-
    સઙ્ગાવાપ્તસ્વજીવામ્બુજભવવદનોદ્દામગીતાભિરામમ્ ।
સ્તબ્ધીભૂતર્ષિનારીગણમધિવિપિનં સર્વશૃઙ્ગારરૂપં
    યં દૃષ્ટ્વા વિષ્ણુમાયા પતિમતિમતનોત્ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૩૦॥

માતૃદ્રોહાઘશાન્તિં સ્વપિતૃનિધનકૃત્ક્ષત્રશૈલેન્દ્રપક્ષ

દ્વન્દ્વચ્છેદાતિતીક્ષ્ણપ્રબલપરશુમપ્યાપ્તુકામો મુનીન્દ્રઃ ।
નૃત્તં યસ્યેદમાત્મન્યનુગતમસકૃદ્ ભાવયન્ જામદગ્ન્યો
રામો લેભે ચિરાયુઃપ્રમુખવરવરાન્ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૩૧॥

યત્પૂજાલબ્ધ ભૂતિપ્રભવિત યુવતી ભાવવૃદ્ધસ્વજાયો
યત્ક્ષેત્રાનેકસેવાશમિતમુનિવરધ્વંસનાગોવિકારઃ ।
તાલાઙ્કો રૌહિણેયઃ પ્રબલહલવરાકૃષ્ટદુષ્ટપ્રલમ્બો
જાતો યસ્ય પ્રસાદાદમૃતકરધરં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૩૨॥

આરુહ્યાશ્વં મુકુન્દઃ પ્રતિકલિવિગમં કલ્કિરૂપી પૃથિવ્યાં
ગચ્છન્પાષણ્ડવર્ગં કુમતિમઘયુતં તત્ર તત્રૈવ સંસ્થમ્ ।
અઙ્ગુષ્ઠાકારભાજં યદમલકરુણાવાપ્તખડ્ગેન નિઘ્નન્
સર્વાં ભૂમિં યથાવત્કલયતિ તમજં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૩૩॥

મધ્યે માર્ગં સ્વભક્તં દ્વિજવરજનુષં ગણ્ડભેરુણ્ડસિંહ
વ્યાઘ્રાશ્વેભર્ક્ષતાર્ક્ષ્યપ્લવગનરમુખે માધવે ભક્ષયિત્વા ।
ક્રોધાદ્બ્રહ્માણ્ડવર્ગં મુહુરપિ ચ મુધા તર્જયત્યાશુ તં યઃ
હત્વાઽરક્ષત્સ્વભક્તં જગદપિ સકલં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૩૪॥

યેનોક્તં રાજતાદ્રૌ ચરિતમનિતરજ્ઞાતપૂર્વં મૃડાન્યૈ
શ્રુત્વા તદ્યોગલબ્ધભ્રમરવરતનુઃ પુષ્પદન્તઃ સ્વસખ્યા ।
પ્રાકાશ્યં નીયમાનઃ કુપિતનગસુતાશાપતો મર્ત્યયોનૌ
ઉત્પન્નઃ સંસ્તુવન્ યં સ્વપદમધિગતઃ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૩૫॥

દૈત્યાનાં ધ્વંસનાર્થં સકલમપિ જગદ્રક્ષણાર્થં મુરારિઃ
લક્ષ્મ્યા ક્ષીરામ્બુરાશૌ કૃતકઠિનતપાઃ સામ્બમૂર્તિં પ્રભું યમ્ ।
ભક્ત્યા સમ્પૂજ્ય ચિત્તે મનુવરમપિ યન્નામસાહસ્રસંજ્ઞં
સ્તોત્રં લબ્ધ્વા જપન્સ્તત્પ્રભુરભવદજં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૩૬॥

આજ્ઞા યસ્યાખિલાનાં ન ભવતિ હિ સદા લઙ્ઘનીયા યદીયં
તત્ત્વાતીતસ્વરૂપં વિધિમુખવિબુધા વર્ણિતું નૈવ શક્તાઃ ।
યં દ્રષ્ટું વેદવાચોઽપ્યગણિતવિભવં નૂનમદ્યાપિ યત્નં
કુર્વન્ત્યમ્બાસહાયં સનકમુખગુરું કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૩૭॥

યુદ્ધે સઞ્જાતકમ્પઃ પિતૃપતિતનયો ભીષ્મમુખ્યપ્રવીરાન્
ચક્રાબ્જાકારસેનાગતરથગજરાડશ્વપાદાતિવર્ગાન્ ।
જેતું કૃષ્ણોપદિષ્ટો મધુમયનુતિભિસ્તોષયન્ યસ્ય શક્તિં

દુર્ગાં તસ્યાઃ પ્રસાદાદજયદરિબલં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૩૮॥

યસ્યાઘોરાસ્ત્રરૂપં વસુકરવિધૃતોદ્દણ્ડભેતાલ ઘણ્ટા-
ઢક્કા ખેટાસિપાત્રત્રિશિખશિખિશિખં ભીમદંષ્ટ્રાધરોગ્રમ્ ।
સૌવર્ણશ્મશ્રુવક્ત્રં રથમુખનિહિતસ્વાઙ્ઘ્રિમારક્તવસ્ત્રં
ધ્યાયેચ્ચેત્કાલમૃત્યું તરતિ વિધુજટં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૩૯॥

આરોગ્યં લબ્ધુકામો દિવસકરમહામણ્ડલાન્તર્યમમ્બા-
યુક્તં રુક્માભમાદ્યં કલયતિ નિતરાં યો જપન્ રૌદ્રમન્ત્રાન્ ।
તસ્ય ત્વઙ્માંસરક્તાવયવગતમહારોગવર્ગાઃ પ્રણાશં
યાન્તિ શ્રીસુન્દરાઙ્ગઃ સ ચ ભવતિ શિવં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૪૦॥

પુત્રાકાઙ્ક્ષી પુમાન્યઃ પરશુમૃગવરાભીતિહસ્તં ત્રિનેત્રં
ગૌર્યા સ્કન્દેન સાકં વૃષભમધિજુષં સાનુકમ્પં સ્મિતાસ્યમ્ ।
સર્વાલઙ્કારભાજં સકલનિગમવિસ્તૂયમાનાપદાનં
ધ્યાયત્યાપ્નોતિ પુત્રં ગુહમિવ સ ચ તં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૪૧॥

યો વિદ્યાર્થી વટદ્રોર્નિકટતટગતં પુસ્તકજ્ઞાનમુદ્રા-
વીણારુદ્રાક્ષમાલા કૃતકરકમલં યોગપટ્ટાભિરામમ્ ।
તત્ત્વાર્થં બોધયન્તં સકલમુનિતતેશ્ચન્દ્રગઙ્ગાહિભૂષં
યં ધ્યાયત્યાશુ વાગ્મી સ ચ ભવતિ ગુરું કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૪૨॥

ભિક્ષાં દેહીતિ ચક્ષન્ મુનિસુતસહિતઃ ક્રોધભટ્ટારકાખ્યઃ
દૂર્વાસા યન્નગર્યામનધિગતચરુઃ ક્ષુન્નિવૃત્યૈ નિશીથે ।
શક્તિં યસ્યાન્નપૂર્ણાં હૃદિ પરિકલયન્ સત્વરં યત્પ્રસાદા -
વાપ્તક્ષીરાન્નભુક્ત્યા સુખમભજદજં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૪૩॥

કશ્ચિલ્લુબ્ધો ગિરીન્દ્રે મૃગનિબિડવને લિઙ્ગમૈશં યદીયં
દૃષ્ટ્વા ગણ્ડૂષતોયૈઃ સ્વકચધૃતસુમૈર્ભુક્તશેષૈશ્ચ માંસૈઃ ।
પૂજાં કુર્વન્ કદાચિન્નિજનયનવરં ચાર્પયિત્વાઽતિભક્ત્યા
નેત્રે યસ્યાનુરૂપં પદવરમભજત્ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૪૪॥

બાલો વિપ્રસ્ય ગોષ્ઠસ્થિતપશુનિકરં દોહયિત્વા પયોભિઃ
નદ્યાસ્તીરે યદીયં જનિમ સુખકરં પાર્થિવઞ્ચાભિષિઞ્ચન્ ।
ધ્યાયન્ ક્રોધાત્સ્વપૂજાવિકૃતિકરપિતુશ્છેદયિત્વા પદં યં
સ્તુત્વા યત્પાર્ષદાનામધિપતિરભવત્કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૪૫॥

યેષાં વેદોક્તકર્મસ્વનધિકૃતિરભૂદદ્વિજાતા પૃથિવ્યાં
તેષાં ધર્માદિમાપ્ત્યૈ પરશિવરચિતં કામિકાદિપ્રભેદમ્ ।
સાઙ્ગં સિદ્ધાન્તતન્ત્રપ્રકરમપિ ચતુષ્ષષ્ટિસઙ્ખ્યાઃ કલાશ્ચ
યસ્યાદેશાત્પ્રકાશં ત્વનયદગનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૪૬॥

કુર્વન્તઃ ક્ષેત્રવાસં હૃદયસરસિજે ચિન્તયન્તો જપન્તો
વિદ્યાં સૌવર્ણરઙ્ગે યમજહરિનુતં સ્વેચ્છયાવાપ્તનૃત્તમ્ ।
પશ્યન્તઃ સાર્વકાલં વિબુધપરિબૃઢા લબ્ધકામાસ્સુખિત્વા
બાહ્યે સૌધે રમન્તે ચરમવયસિ તં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૪૭॥

સર્વસ્વારાભિધાને દિવિષદભિમતે સપ્તતન્તૌ દ્વિજેન્દ્રઃ
કશ્ચિદ્યજ્વા હુતાશે નિજમપિ ચ વપુસ્ત્યક્તુમત્યન્તભીરુઃ ।
યં ધ્યાત્વા યત્પ્રસાદાદગમદનિતરપ્રાપ્યમૌપાધિહીનં
ધામ સ્વર્ગં સદેહસ્તમતુલવિભવં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૪૮॥

ક્રીડાસંસક્તગૌરીકનકઘટનિભોત્તુઙ્ગવક્ષોજશૈલ-
પ્રોદ્યત્શ઼ૃઙ્ગારમાધ્વીમધુરરસધુની લોલભૃઙ્ગાયતાક્ષમ્ ।
ભૂષાનાગોક્તસૌખ્ય પ્રવચનઘટજસ્તબ્ધગર્વાબ્ધિતાર્ક્ષ્ય-
વ્રીડાકૃચ્છ્વાસવક્ત્રપ્રમથપતિનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૪૯॥

નૃત્તેશં બાણદૈત્યપ્રમુખગણવરોદ્દણ્ડદોર્વૃન્દવર્ય-
ક્રૂરોદ્વેગાહતોદ્યદ્ધટધિમિધિમિતધ્શબ્દભાવાનુકલ્પમ્ ।
તાનાતાનાતનેતિ ક્વણિતદશશતી તન્ત્રિવીણાનુગાનો-
ન્મોદોદ્ગ્રીવાહિભૂષાવલયમભયદં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૫૦॥

સાહસક્રૂરવક્ત્રપ્રભવ ગુરુમરુત્પૂરહું હું ભભં ભં-
ઝઞ્ઝીકૃચ્છઙ્ખશ઼ૃઙ્ગપ્રમુખવરમહાવાદ્યભૃદ્ભાનુકોપમ્ ।
દૃષ્ટ્વા હાહાહહેતિ ભ્રમિતસુરગણાઽભીતિસન્દાયિપાર્ષદ્-
વ્યાપ્તે રઙ્ગે ય ઈશો નટતિ તમનઘં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૫૧॥

કૈલાસાદ્રિં કદાચિત્પ્રબલભુજબલાદ્રાવણશ્ચાલયિત્વા
દાક્ષાયણ્યાઽતિભીત્યા કિમિદમિતિ સમાલિઙ્ગિતસ્યાશુ યસ્ય ।
પાદાઙ્ગુષ્ઠાગ્રનીતદ્વિરસનભુવનક્ષ્માધરોચ્છિન્નબાહુઃ
સામ્ના સ્તુત્વા યમિષ્ટં વરમલભત તં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૫૨॥

શ્રીરુદ્રં કોટિસઙ્ખ્યાત્રિગુણિતમનિશં યત્પુરસ્તાજ્જપિત્વા
શૈલાદિર્યસ્ય શમ્ભોરનવધિકકૃપાપાઙ્ગપૂરાભિષિક્તઃ ।

મત્તુલ્યોઽસિ પ્રિયોઽસિ ત્વમપિ ચ સકલં જ્ઞાતવાન્શ્વાસિ તાતે -
ત્યુક્તો યેનાય યસ્ય પ્રમથપતિરભૂત્ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૫૩॥

શ્રીમાન્ભૃઙ્ગી મુનીન્દ્રો મૃગપરશુકરં દેવમેવૈકમીશં
નત્વા તત્પાર્શ્વગાયા નિજવિમુખરુષશ્ચણ્ડિકાયાશ્ચ વાક્યાત્ ।
શાક્તં માંસાદિવર્ગં સ્વતનુવરગતં પ્રોત્સૃજન્ યત્પ્રસાદાત્
લેભે દણ્ડં ત્રિપાદં સ્વધુરિ ચ વસતિં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૫૪॥

કશ્ચિદ્વિપ્રોરિટાખ્યઃ સ્વપતિનિયમવિધ્વંસકમ્પાતરઙ્ગાં
નારીં દગ્ધ્વા સતીં તચ્ચિતિગતભસિતૈર્લેપયન્ સામ્બમૂર્તિમ્ ।
નૈવેદ્યં કર્તુમિચ્છન્નિહ નય ચરુમિત્યાહ્વયન્ યત્પ્રસાદાત્
કાન્તાં ભેજે નિજાન્તે શિવપદમપિ તં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૫૫॥

ગૌર્યાં શ ृઙ્ગારવાપ્યાં સ્વસખિવરગણૈઃ ક્રીડયન્ત્યાં કપર્દી
ગત્વા તદ્ધસ્તપદ્માત્ જનિતમપિ નરં દ્વાઃસ્થમુદ્દણ્ડચણ્ડમ્ ।
હત્વાન્તસ્સમ્પ્રવિષ્ટઃ કુપિતસખિમુદે તં પુનર્જીવયિત્વા
તસ્મૈ વિઘ્નેશ્વરત્વપ્રમુખવરમદાત્કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૫૬॥

એકાન્તે જાતુ યસ્ય પ્રમુદિતમનસા પ્રોક્તવેદાન્ત તત્ત્વો-
પેક્ષારુષ્ટસ્ય વાક્યાદ્ધિમગિરિતનયા ધીવરાધીશવંશે ।
આવિર્ભૂયામ્બુધિસ્થપ્રબલશફરસઙ્ગ્રાહિણં યં વરેણ્યં
વૃત્વા તદ્વામભાગે વસતિમપિ ગતા કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૫૭॥

કેકી ભૂત્વા મૃડાની સ્વપિતૃકૃતશિવદ્વેષસંવૃદ્ધપાપં
ભસ્મીકર્તું પુરાણં શતધૃતિરચિતે કાનને યં ત્રિણેત્રમ્ ।
સમ્પૂજ્યાનન્દદૃષ્ટં નટનમતિમુદા વીક્ષમાણા કૃપાર્દ્રૈઃ
યસ્યાલોકૈઃ પુનીતા સમજનિ નિતરાં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૫૮॥

યસ્ય ક્ષેત્રે મૃતાનાં સકલજનિભૃતાં સઞ્ચિતાદીનિ પાપા-
ન્યબ્દાનેકપ્રભોજ્યાન્યપિ ચ નિમિષતો ભૈરવરશ્શૂલઘાતાત્ ।
ભસ્મીકૃત્યાશુ ભૂયો જનનમૃતિહરં તારકં યન્નિદેશાત્
તત્ત્વં સમ્બોધયન્યત્સદસિ વસતિ તં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૫૯॥

વિષ્ણોરન્યઃ પરો નેત્યસકૃદપિ મુધા જલ્પમાનં મુનીન્દ્રં
નન્દી કોપપ્રભૂતસ્તનિતનિભરવસ્તમ્ભિતપ્રોચ્ચબાહુમ્ ।
વ્યાસં દૃષ્ટ્વા મુકુન્દઃ સ્વપતિરિતિ શિવં બોધયન્ યત્કૃપાયા
નિન્યે પાત્રત્વમીશં તમખિલવિનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૬૦॥

સર્વે દેવાશ્ચ વિષ્ણોર્હૃદયસરસિજોદ્ભાસિ લિઙ્ગં યજન્તઃ
    ક્રુદ્ધેઽપ્યન્યોન્યચર્ચાપદઘનવિલસત્પઞ્ચરુદ્રાદિમન્ત્રૈઃ ।
સ્તુત્વા યત્પ્રાપ્તવિદ્યાજપપરકવિરાડ્યોગસન્તપ્તલોકાન્
    સૌખ્યં નિન્યુર્નિતાન્તં યદમલદયયા કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૬૧॥

યસ્યોક્ત્યા વિઘ્નરાજસ્સુરગણવિનુતો રક્ષસાં સાર્વભૌમાત્
    માયાસમ્મોહિતાદ્યજજનિમ શુભકરં બાહુનાઽઽદાય ભૂમ્યામ્ ।
સંસ્થાપ્યાગ્રે યુયુત્સું તમપિ નિશિચરં સ્વીયશુણ્ડાગ્રરન્ધ્રા-
    કર્ષાત્સમ્ભુગ્નદેહં દશભુજમકરોત્કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૬૨॥

આર્યાવામાંસભૂષાનવમણિગણભાસઙ્ગવૈવર્ણ્યનીલ-
    ગ્રીવાલોકાતિશઙ્કિપ્રસૃતવિષભયાક્રાન્તદિક્પાલવર્ગમ્ ।
ચૂડાચન્દ્રાજિહીર્ષાદરવિવૃતફણાકુણ્ડલીકર્ણલોલદ્
    ગઙ્ગાકૂલાયમાનસ્વસટવરવનં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૬૩॥

શિઞ્જન્મઞ્જીરમઞ્જુદ્યુતિશમિતજગન્મોહમાયાવિલાસં
    ફાલાક્ષિસ્ફારકુણ્ડપ્રભવહુતવહધ્વસ્ત કામપ્રભાવમ્ ।
સંસારામ્ભોધિમધ્યભ્રમદખિલજગત્તારનૌકાયિતાઙ્ઘ્રિં
    દ્વન્દ્વાદ્વન્દ્વાદિશૂન્યં વિજયિનુતકૃતિં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૬૪॥

એકાન્તે યસ્ય લીલારદવસનસુખાસ્વાદદન્તક્ષતાનિ
    વ્યાઘ્રત્વગ્રોમરૂક્ષા કનકમૃદુતરક્ષૌમભૂતીરજાંસિ ।
દૃષ્ટ્વા કસ્માદિયં શ્રીસ્ત્વયિ ભવતિ વદેત્યાલિગીઃ સોપહાસં
    શ્રુત્વા ગૌરી તદાસીન્નતમુખકમલા કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૬૫॥

ક્રીડન્નાસ્તે મહેશો ગિરિવરસુતયા સપ્રમોદં મનોજ્ઞે
    હર્મ્યે નૈવાદ્ય દેવા ગદિતુમવસરો યાત મૌનેન શીઘ્રમ્ ।
એવં કોપારુણાક્ષો વિધિહરિમુખરાન્ વારયન્ યદ્દ્વરાભૃન્ -
    મૂલે નન્દી ગણેન્દ્રૈર્વસતિ તમપરં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૬૬॥

અક્ષક્રીડાસુ લબ્ધત્રિદશપુરવધૂબોધનાત્સ્વાન્તકાલે
    નૂત્નાનૂત્નાનુયોગાત્સવિશયશમનપ્રાપ્તયત્સન્નિધાનઃ ।
પાપારોપાતિરોષપ્રહરણસભયોદ્ભ્રાન્તચિત્રો યદુક્ત્યા
    વિપ્રઃ કશ્ચિન્નિધીનામધિપતિરભવત્કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૬૭॥

હંસ્યાં લબ્ધસ્વજન્મા કરટવરવપુસ્સ્વર્ણકાન્તિર્ભુસુણ્ઠો

લેભે યસ્ય પ્રસાદાદનિતરસુલભં મૃત્યુભીતેરભાવમ્ ।
કલ્પે કલ્પે વસિષ્ઠપ્રમુખમુનિવરપ્રશ્રુતાનેકવૃત્તોઽ
પ્યાસ્તે યદ્ધ્યાનયોગાત્કનકગિરિવરે કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૬૮॥

ધૂમ્રાક્ષં રક્તબીજં મહિષમપિ મધું કૈટભં ચણ્ડમુણ્ડૌ
ક્રૂરં શુમ્ભં નિશુમ્ભં સુરરિપુમપરં દુર્ગમત્યુગ્રવૃત્તમ્ ।
હત્વા યુદ્ધે વિધીન્દ્રપ્રમુખમકુટભાદીપ્તસિંહાસનસ્થા
દુર્ગા યસ્યાદિશક્તિઃ નિખિલમવતિ તં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૬૯॥

જ્યોતિષ્ટોમાખ્યસોમક્રતુસવનહવિઃપુઞ્જમત્યન્તભક્ત્યા
ગૂઢાકારં યમીશં સગણમપિ શિવં યજ્ઞવાટપ્રવિષ્ટમ્ ।
હેરમ્બોક્ત્યા પ્રબુધ્વા સ્વયમપિ મુદિતો યાજ્યયા યત્કરાબ્જે
દત્વા મારાભિધોઽગ્ર્યઃ શિવનગરમગાત્કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૭૦॥

ક્રીડાર્થં સ્વાગ્રભાગસ્થિતગિરિતનુજાવક્ત્રચન્દ્રાવલોક
પ્રોદ્યત્કન્દર્પરક્ષામુકુલિતવરદૃક્ભાલપટ્ટાભિરામમ્ ।
લીલાડોલાનુકૂલશ્વસનમુખવૃષપ્રાન્તરાયાતમોહ -
ભ્રાન્તસ્વર્ધેનુમૃગ્યત્સુરનિજશરણં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૭૧॥

વિધ્યણ્ડાનેકકોટિચ્યુતિકરડમરુસ્ફારઘોષાન્ નિતાન્તં
કલ્પાન્તાશઙ્કિલોકાભયકરવલયવ્યાલરત્નાંશુકાન્તમ્ ।
તિર્યક્કિઞ્ચિત્પ્રકુઞ્ચીકૃતપદરવિભાવાપ્તિમોદાનુધાવદ્ -
હસ્તં પ્રોચ્ચપ્રસર્પચ્છિખિલસિતકરં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૭૨॥

ભો ભોઃ ભ્રાતસ્તવૈષા ષડપિ વદનતા બ્રૂહિ મહ્યં કિમર્થં
જાતા ચેત્યાદરેણ દ્વિપવરવદનેનાનુપૃષ્ટે કુમારે ।
સ્વામિન્ષટ્ચ્છાસ્ત્રમધ્યાભ્યસિતુમથ પિતુશ્ચૈકદેતિ બ્રુવાણે
દૃષ્ટ્વાઽજિઘ્રત્પુરા યો ગુહમધિગિરિ તં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૭૩॥

મત્સ્યાક્ષિ ક્રૂરકૂર્માત્ પૃથુતરકઠિનત્વગ્ વરાહેન્દ્રદંષ્ટ્રા
ઘોરત્રૈવિક્રમાસ્થિ પ્રબલનરહરિસ્ફારરક્તાજિનાનિ ।
વિષ્ણોર્નેત્રામ્બુજાતં વિધિમુખનિચયં પૂષદન્તાંશ્ચ ધૃત્વા
યસ્તદ્દર્પપ્રશાન્ત્યૈ પ્રથયતિ વિભુતાં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૭૪॥

આસેતોરાસુમેરોર્ધરણિગતનિજક્ષેત્રવર્યેષુ નિત્યં
સાહસ્રાકારભાજાં સ્વતનુમધિ ચ જુષચ્ચિત્કલાનાં પ્રમોદાત્ ।
એકાં સંયોજયંસ્તાં નિશિ નિશિ નિજહૃત્પઙ્કજે સન્નિરુન્ધન્

યો ભાત્યાનન્દમૂર્તિર્બહુવિધફલદં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૭૫॥

કલ્પે કલ્પે સ્વકીયપ્રભવલયભયં ત્યક્તુમાદ્યે પરાર્ધે
વેદા યં કાલકાલં બહુવિધતપસા તોષયિત્વા યદુક્ત્યા ।
ત્રૈસાહસ્રં દ્વિજત્વં દિવિષદસુલભં લબ્ધવન્તઃ ક્રમેણ
નિત્યં યં પૂજયન્તિ સ્વસરણિવિધિના કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૭૬॥

યસ્યોત્કર્ષં ચ વિષ્ણોસ્સદનમધિગતો વહ્નિસન્દગ્ધપીઠે
સ્થિત્વા શ્રુત્યન્તવેદ્યં શિવમપિ પરમં બોધયન્સ્વાં ચ ભૂતિમ્ ।
ધિક્કુર્વન્ દુર્મતીનાં નિકરમપિ યદીયાજ્ઞયા બન્ધુવર્ગૈઃ
વિપ્રઃ કશ્ચિદ્ બુધેડ્યો રજતગિરિમગાત્કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૭૭॥

ગૌર્યાઃ પાણિં ગૃહીત્વા હિમગિરિકટકે સત્વરં સ્થૂલપૃષ્ઠં
ધર્માકારં વૃષેન્દ્રં નિજચરણજવોલ્લઙ્ઘિતામ્ભોધિવર્ગમ્ ।
અધ્યારૂઢો નિજાઙ્કસ્થિતગિરિતનયાં પ્રેયસીં વાગ્વિલાસૈઃ
લજ્જાનમ્રાં પ્રકુર્વન્નતનુત વિહૃતિં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૭૮॥

યત્ભાલસ્થં મૃગાઙ્કં સ્વરદમિતિ મુધા શુણ્ડયાઽઽદાય તસ્મિન્
બિમ્બે દૃષ્ટસ્વવક્ત્રપ્રતિફલનસમાકર્ષણવ્યગ્રચિત્તમ્ ।
દાનામોદાનુધાવદ્ભ્રમરમુખરિતસ્વર્ગપાતાલભાગં
યોઽજિઘ્રત્સ્વાઙ્ગસંસ્થં ગજમુખમનિશં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૭૯॥

કાત્યાયન્યાઃ કરાબ્જં દિનકરવદનાધીતવેદાર્થબોધાત્
લબ્ધાનન્દાન્તરઙ્ગપ્રશમિતતમસસ્તાપસસ્યાશ્રમે યઃ ।
ગૃહ્ણન્ સંસારવાર્ધાવધિકભયકરે મગ્નસત્વપ્રપઞ્ચં
નિત્યં રક્ષન્નજસ્રં જયતિ શિવપુરે કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૮૦॥

યન્મૂર્તિં બ્રહ્મનિષ્ઠાઃ પરમહસિ પદે પ્રાજ્ઞમાનન્દરૂપં
શૈવાસ્સદાખ્યમૂર્તિં હરિમિતિ ચ પરે શક્તિમન્યેઽપરે તુ ।
વિઘ્નેશં ચેતરેઽહ્નાં પતિમિતિ વટુકસ્કન્દવિધ્યગ્નિશક્રાન્
ઇન્દું કેચિદ્વિભાવ્યાખિલસુખમભજન્કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૮૧॥

એકં બ્રહ્માદ્વિતીયં ત્રિવિધમપિ ચતુર્વાઙ્મયં પઞ્ચબાણ-
ભ્રાતૃવ્યં ષડ્વિપક્ષદ્વિષદભિવિનુતં સપ્તજિહ્વાલિકાક્ષમ્ ।
અષ્ટમ્યેણાઙ્કચૂડં નવરસનટનાલોલવાસો દશાશં
રુદ્રૈસ્સાદિત્યવર્ગૈઃ સતતનતપદં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૮૨॥

વિષ્ણોર્લલાટદેશચ્યુતરુધિરઝરીસઙ્ગમેનાપ્યપૂર્ણં
    બ્રાહ્મં હસ્તે કપાલં ડમરુમપિ વહન્ વિશ્વકદ્રૂન્ સ્વપાર્શ્વે ।
દંષ્ટ્રાગ્રાભાપિશઙ્ગીકૃતવિપુલજટો ભૈરવઃ ક્ષેત્રપાલો
    વિશ્વં રક્ષન્નુપાધેર્યમપિ ભજતિ તં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૮૩ ॥

સીતાહસ્તાબ્જપિણ્ડીકૃતવરપૃથિવીલિઙ્ગમૂલાનુકર્ષ -
    ત્રુટ્યદ્વાલાસ્યશાખામૃગપતિરચિતસ્તોત્રતુષ્ટાન્તરઙ્ગમ્ ।
રક્ષોવૃન્દપ્રહારપ્રભવકલિનિવૃત્ત્યાશ્રિતામ્ભોધિતીર -
    શ્રીરામપ્રષ્ઠરાજાર્ચિતપદયુગલં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૮૪ ॥

યોગાન્નિર્બીજસંજ્ઞાત્સમુદિતપરમાનન્દકાષ્ઠાસમાધિ-
સ્થિત્યા વલ્મીકગૂઢાં તનુમવનિગતાં નીતકલ્પાં ધરન્ સ્વામ્ ।
શ્રીમાન્ શ્રીમૂલસંજ્ઞો નૃપનુતચરિતો નિત્યનિસ્સઙ્ગવિદ્યોઽ-
પ્યાદ્યસ્સિદ્ધો યમન્તઃ કલયતિ નિતરાં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥

હલ્લીસોન્મુખ્યકેલીનમિતનિજશિરસ્સંસ્થગઙ્ગામુખેન્દોઃ
    આલોકોત્પન્નકોપત્વરિતગતિશિવાસાન્ત્વનવ્યગ્રચિત્તમ્ ।
દૃષ્ટ્વા કણ્ઠસ્થનીલં જલમુગિતિમુધાઽઽયાતકૌમારવાહાત્
    બિભ્યદ્ભૂષાફણીનાં મણિરુચિ સુષમં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૮૬ ॥

સ્વર્ગાધીશોપદિષ્ટામખિલસુખકરીં યત્તિરોધાનશક્તેઃ
    વિદ્યાં મોદાજ્જપિત્વા સુરયુવતિસમામાપભૈમીં સ્વકાન્તામ્ ।
યત્સેવાનિર્ગતાઽઽર્કિગ્રહરચિતમહોપદ્રવો નૈષધેન્દ્રો
    વિશ્વં રક્ષન્નિજાન્તે દ્યુસદનમભજત્કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૮૭ ॥

કન્દર્પાણાં બહૂનાં પ્રસવકરવરાપાઙ્ગવીક્ષાવિલાસૈઃ
    ઉદ્યાને રાજતાદ્રેર્હરિધૃતસુતનોઃ શાસ્ત્રભિખ્યં કુમારમ્ ।
ઉત્પાદ્યાયાતગૌરીમધુરવચનતઃ પાલકત્વં વનાનાં
    સર્વેષાં દત્તવાન્ યસ્ત્રિજગદભિનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૮૮ ॥

મુગ્ધે કૈલાસવાસીજરઠશુભકરો ગૌરિ ચર્મામ્બરોઽસૌ
    બ્રહ્મન્નૈશ્વર્યદોઽમ્બે પિતૃભુવિ નટકૃદ્વિપ્ર કૈવલ્યદાતા ।
એવં યદ્વાક્યભઙ્ગીં મુહુરપિ ચ તિરસ્કૃત્ય સદ્માન્તરાલં
    ગન્તું વ્યગ્રામુમાં યોઽપ્યકુરુત મુદિતાં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૮૯ ॥

યદ્ધાસેન્દુપ્રભૂતા નિખિલમપિ જગદ્વ્યાપિની ચન્દ્રિકાભા-
    પ્યાવિષ્ણુ સ્થાવરાન્તં હૃદયમધિગતં બાહ્યગં ચાન્ધકારમ્ ।

દૂરીકૃત્યાશુ સર્વાન્ સ્વપદસરસિજધ્યાનશીલાનજસ્રં
   રક્ષત્યાદ્યન્તહીનં ગુરુભૃગુવિનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૯૦॥

ગોદાવર્યાસ્તટસ્થોઽનૃતવચનપરો દુષ્ટકાર્તાન્તિકો યત્
   ક્ષેત્રે ગૌલ્યાં જનિત્વા નિજસુકૃતલવાત્સ્વીયપાતોક્તિદોષમ્ ।
ભસ્મીકર્તું ચિરં યં સ્તુતિભિરભિનમન્ સુન્દરાઙ્ગો યદુક્ત્યા
   જાતો યત્ક્ષેત્રપાલો જયતિ તમસમં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૯૧॥

ભુક્ત્વા હાલાહલાંશં યુધિ નિહતતનું દારુકાખ્યં સુરારિં
   કૃત્વા ઘોરસ્વકૃત્યપ્રચલિતભુવનાં ભદ્રકાલીં શિવો યઃ ।
પ્રત્યેત્યાનન્દનૃત્તં પિતૃપતિભુવને દર્શયિત્વા તયાઽણ્ડાન્
   સર્વાન્સંરક્ષતીશસ્તમિનવિધુનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૯૨॥

યસ્યોદ્વાહે હિમાદ્રિં ગતવતિ નિખિલપ્રાણિવર્ગેઽર્કસૂનોઃ
   આશામૌન્નત્યભાજં રચયિતુમધરાં વિન્ધ્યમદ્રિઞ્ચ દૈત્યમ્ ।
ધિક્કર્તું કુમ્ભજન્મા ચુલુકિતજલધિઃ પ્રેષિતો યેન મોદાત્
   તં દેવં કોટિકોટિ દ્યુમણિતનુરુચિં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૯૩॥

વીણાસઙ્ક્રાન્તકાન્તામધુરતરરસાલાપગીતિપ્રમોદ -
   પ્રોદ્યદ્રોમાઞ્ચ કૂટદ્વિગુણતનુલતાભોગસૌન્દર્યશિલ્પમ્ ।
યન્નાનારત્નભૂષાકિરણકબલિતે દિક્તટે વપ્રલીલાં
   કુર્વન્ત્યદ્યાપિ મોદાત્ દ્વિરદપરિબૃઢાઃ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૯૪॥

કસ્ત્વં કિન્નામધેયો ધરણિસુરવપુઃ કમ્પિતાપાદચૂડો
   ગોત્રં સૂત્રં કુલં ત્વત્પિતરમપિ તથા માતરં બન્ધુવર્ગમ્ ।
શત્રું મિત્રં કલત્રં તનયમપિ વયો જ્ઞાતુમીહે તવેતિ
   પ્રોવાચાદ્રૌ પુરા યં પ્રતિ ગિરિતનયા કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૯૫॥

સ્કન્દે વિઘ્નેશશુણ્ડાં સ્વકરસરસિજૈઃ માનયિત્વા તદુક્તૈઃ
   સ્વીયૈર્વક્ત્રાક્ષિસઙ્ખ્યાગણનપરિભવૈ રોદિતે સાનુકમ્પા ।
દેવી દૃષ્ટ્વા સ્વસૂનોશ્ચરિતમપિ યદીયાજ્ઞયા હેમકૂટે
   વાચા સપ્રેમભાજાવતનુત તનયૌ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૯૬॥

સ્વામિન્ માઽસ્ત્વાધિપત્યં શમનપદમહારાજ્યભારે મમાલં
   પાશં દણ્ડઞ્ચ વાહં મહિષમપિ ભટાન્ ત્વત્પદેઽદ્યાર્પયેઽહમ્ ।
ઇત્યુક્ત્વાગ્રે નતાસ્યં શિવયજનપરાકર્ષ કુપ્યદ્ગણેન્દ્રો-
   દ્વિગ્નં દૃષ્ટ્વા યમં યોઽપ્યકુરુત મુદિતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૯૭॥

પિત્રોર્દુઃખૈકહેતું કમઠનિભતનું પાપજાં સ્વાં પ્રમોક્તું
વાર્ધૌ સ્થિત્વા નિરુન્ધન્ રથમપિ તરણેસ્તન્મુખાધસ્ય વિધામ્ ।
લબ્ધ્વા જમ્વાઽથ ભૂત્વા સુરયુવતિસમાહ્લાદિ સૌન્દર્યકાયો
રાજા સ્વામાત્યપુત્રીપરિણયમકરોત્કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૯૮॥

કિં દારૈઃ કિઞ્ચ પુત્રૈઃ કિમિતિ ચ વસુભિઃ કિં સુહૃદ્ભિઃ કિમન્યૈઃ
ભૂયાન્નાસ્ત્યેવ સત્યં ફલમિતિ હૃદયે સન્તતં ચિન્તયન્તઃ ।
ત્યક્ત્વા દુઃખાદિહેતું યદમલવસુધાપ્રાન્તક્લૃપ્તાશ્રમાસ્તે
સિદ્ધાસ્સર્વે બભૂવુર્યદનુગતધિયઃ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૧૯૯॥

હેમાદ્રિપ્રાન્તભાગસ્થલકમલવનાક્રીડનોદ્યોગહંસ-
વ્રાતાલોકાપદેશાત્સવિધગતશિવાહસ્તગાઢોપગૂઢમ્ ।
નાનાકારાનુભૂતાનુપમરતિસમુત્કૂજિતાર્યાકુચાગ્ર-
સ્પર્શોન્મૃષ્ટાલિકાન્તસ્થલસિતભસિતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૦૦॥

દ્રષ્ટું નૈવાદ્ય વિષ્ણો ભવતિ ચ સમયો વેદવાક્યાર્થબોધે
બ્રહ્મન્કાલો ન ચૈષો હરિમુખવિબુધા ગચ્છતાન્યત્ર યૂયમ્ ।
આસ્તાં વીણામુને સોઽપ્યુપદિશતિ પરં બ્રહ્મતત્ત્વં મુનીનાં
ઇત્યુક્ત્વા તાન્યદુક્ત્યા ત્વરયતિ ગણરાટ્ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૦૧॥

યદ્વર્ષં માનુષાણાં તદપિ ચ દિવસં દેવતાનાં પ્રસિદ્ધં
પ્રોક્તં તચ્ચાપકુમ્ભ પ્રથમયુગહરિસ્ત્રીષુ માસેષુ ષટ્સુ ।
આસન્ યન્નૃત્તમૂર્તેરુદયમુખવરાભ્યર્ચનાસ્તે તમિન્દ્રા-
દ્યષ્ટાશાપાલપૂર્વાખિલસુરવિનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૦૨॥

યસ્યેશસ્યાંશભૂતાશ્શરભ-વટુકરાડ્વીરભદ્રાદિદેવાઃ
કલ્પે કલ્પેઽમ્બુજાક્ષદ્રુહિણમુખધૃતક્રૂરસત્વોગ્રકૃત્યમ્ ।
નિઘ્નન્તસ્સાર્વકાલં જગદપિ સકલં પાલયન્તોઽન્તરઙ્ગે
ધ્યાયન્તો યં જયન્તિ પ્રસૃમરમહસં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૦૩॥

કુપ્યત્તાતોક્તિભઙ્ગ્યા વિપિનમધિગમન્ વિપ્રગોસઙ્ઘરક્ષાં
કુર્વંસ્તત્રૈવ દિષ્ટ્યા સરસિ ચ વિહૃતિં તન્વતીનાં સુરીણામ્ ।
ગાયન્તીનાં મનાંસિ સ્વવશમપિ નયન્ યત્પદધ્યાનયોગાત્
રેજે કશ્ચિન્નરેન્દ્રો જિતરિપુનિકરઃ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૦૪॥

સૌવર્ણશ્મશ્રુકાન્ત્યા કપિશકુમુદિનીનાથબિમ્બં વિજેતું

નાસાલોલમ્બભૂષામણિરુચિભિરિવ પ્રોન્નટદ્દિવ્યસિન્ધુમ્ ।
મૂર્ધ્ના બિભ્રાણમચ્છચ્છવિમુખકમલામોદપુષ્પન્ધયાક્ષં
નાનાવિદ્યાઙ્કુરાભદ્વિજગણલસિતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૦૫॥

જ્વાલામાલાન્તરાલ પ્રવિલસદમલસ્વાઙ્ગલોલમ્બ ચેલા
મૂલાલગ્નાલિશિલ્પોલ્લલિતકટિરટત્કિઙ્કિણી જાલભૂષમ્ ।
નૈલીહાલાહલાભાકબલિત જલમુક્તારકોલાહલોદ્યત્ -
કેલીમાયૂરલાસ્યપ્રમુદિતલલનં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૦૬॥

યો યસ્ય જ્ઞાનશક્તિં દહરકુહરિણીં શ્રીમહાષોડશાર્ણાં
વિદ્યાં શ્રીનાથવીરૈઃ ગુરુભિરપિ નુતાં યોગિનીદૂતિસેવ્યામ્ ।
આત્માભિન્નાં શિવાં તાં હૃદિ પરિચિનુતે સ સ્વયં નિર્વિકલ્પો
ભૂત્વા યોગીન્દ્રપૂજ્યો ભવતિ તમગુણં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૦૭॥

યચ્છમ્ભોર્નૃત્તરઙ્ગં પિતૃભુવનમભૂત્કાલકૂટં ચ ભિક્ષા
ભૂષા નાગા વિભૂતિર્મલયભવરજો બ્રહ્મશીર્ષં કપાલમ્ ।
અદ્રિઃ શય્યા ચ વસ્ત્રં ત્વગપિ સહકૃતા ભૂતભેતાલવર્ગાઃ
વાહશ્ચોક્ષાપતિસ્તં ધૃતહરિવિશિખં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૦૮॥

વાસિષ્ઠબ્રહ્મદણ્ડપ્રમુષિતસુધનુર્બાણસેનાસમૂહો
બ્રાહ્મણ્યપ્રાપ્તિકામો રચિતવરતપાઃ કૌશિકઃ ક્ષત્રવર્યઃ ।
તુષ્ટસ્વાયમ્ભુવાસ્યપ્રભવિતસવિતૃખ્યાત યચ્છક્તિ વિદ્યા -
પ્રાપ્તસ્વેષ્ટાનુભાવો ભુવિ જયતિતરાં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૦૯॥

યાતાયાતાદિહીનં યમનિયમપરપ્રાર્થિત બ્રહ્મતત્ત્વં
યજ્ઞં યજ્ઞાગ્નિરૂપં યજનકરબુધૈરીડ્યમાનં ત્રિસન્ધ્યમ્ ।
યાથાર્થકારલીનાખિલ ભુવનમજં યામિનીશાનચૂડં
યાગ્ચાકાપટ્યહીનં યતિવરવિનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૧૦॥

વિશ્વેશં વિશ્વવન્દ્યં વિવિધભયહરં વિશ્વરૂપં વૃષાઙ્કં
વિષ્ણું વિન્ધ્યારિકાન્તામુખરમુનિસતી પૂજિતાઙ્ઘ્રિં વિરાગમ્ ।
વિદ્યાવિશ્રાન્તિ ભૂમિં વિધુધરમકુટં વ્યુપ્તકેશં વિનાશ-
સ્થિત્યુત્પત્યાદિહેતું વિકૃતિમવિકૃતિં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૧૧॥

કેલ્યામૌત્સુક્યભાજા તુહિનગિરિજયા સસ્પૃહં દત્તવીટી-
સેવારક્તાધરોષ્ઠદ્યુતિજિતદિનકૃદ્બાલબિમ્બાંશુચક્રમ્ ।
ગીતિ પ્રાવીણ્યશૈલી પ્રકટનકુતુકાત્ હસ્તવાસ્તવ્યલોલાં

વીણાં સંવાદયન્તં પ્રથમરસમયં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૧૨॥

અશ્વત્થામા કૃપાર્યો બલિરપિ હનુમાન્ કુમ્ભકર્ણાનુજાતો
વ્યાસર્ષિર્જામદગ્ન્યોઽપ્યધિગતયશસસ્સપ્ત ધીરા મહાન્તઃ ।
યત્પાદાબ્જાર્ચયાઽઽપુર્જનિમદસુલભં શ્રીચિરઞ્જીવિભાવં
તં કૃષ્ણશ્વેતરક્તદ્યુતિમતિકરુણં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૧૩॥

જાયાદાનપ્રકુપ્યત્સ્વજનકૃતરણાવેશકાલે પ્રસન્નં
યં દૃષ્ટ્વા નેત્રવારિસ્નપિતતનુલતાભોગસાતઙ્કકમ્પઃ ।
યસ્યાઙ્ઘ્રિધ્યાનભાનુપ્રકટિતવિભવો વૈશ્યજો ભક્તવર્યોઽ-
પ્યધ્યારૂઢો વૃષેન્દ્રં રજતગિરિમગાત્ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૧૪॥

ત્યક્તસ્વસ્વાધિકારાસ્સરસિજનયનાશ્ચાગતં દેવસૌખ્ય-
પ્રાપ્ત્યૈ ગોવિન્દમુક્ત્વા કુશલમપિ કરાશ્લેષપૂર્વં પ્રમોદાત્ ।
વત્સ ત્વં બ્રહ્મતત્વં હૃદિ ન વિકલયન્પ્રાર્થ્યસે દુઃખહેતું
કર્મેત્યુદ્બોધયન્તો યમપિ ગિરિવરે કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૧૫॥

ભો ભો બ્રહ્મર્ષિમુગ્ધાઃ સદયમપિ મયા શિક્ષિતાશ્ચાપ્યજસ્રં
વેદાન્તે તત્ત્વબોધે ન ભવત વિબુધા યત્તતોઽદ્યાપિ યૂયમ્ ।
મેધાપ્રાપ્ત્યૈ સભેશં વ્રજત શરણમિત્યાદરાદ્બોધયિત્વા
ધાતા યત્ક્ષેત્રરાજં મુનિગણમનયત્કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૧૬॥

ગીર્વાણાદ્રિં કદાચિદ્વિપુલરદનયોરન્તરે સ્વર્ણરમ્ભા-
ભ્રાન્ત્યા સન્ધાર્ય વેગાદ્રજતગિરિવરે ક્રીડયન્તં ગણેશમ્ ।
દૃષ્ટ્વા પ્રેમ્ણાઽદ્રિજાતા યમપિ ચ તરસાઽઽહૂય નિર્દિશ્ય સૂનોઃ
વૃત્તં તુષ્ટાઽભવત્તં દિવિષદધિપતિં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૧૭॥

સોત્સાહં વીરબાહુપ્રમુખસખિયુતો દોર્ભિરબ્ધિં ષડાસ્યઃ
તીર્ત્વા પૂર્વક્ષમાભૃચ્છિખરમધિજુષં બાલમાર્તાણ્ડબિમ્બમ્ ।
ચોલીમાનીયમાનો ધુરિ ચ વિરચયન્સૈંહિકેયસ્ય લીલાં
યદ્વાચા સંવ્યધાત્તં નભસિ ચ પરમં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૧૮॥

સદ્વ્યોમ વ્યાપિ-તારપ્રવલયવિલસદ્જ્ઞાનવાઞ્છાક્રિયાદિ-
શ્રીમચ્ચિચ્છક્તિ વિદ્યાહૃતવિપુલતમો રાજસં સદ્ભ્રુકુમ્સમ્ ।
ગાઢાઽવિદ્યાકવાટોન્નયનશમમુખદ્વારપાલાભિગોપ્યન્-
મોક્ષદ્વારાન્તરઙ્ગોપનિષદુપચિતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૧૯॥

આવિઃ સ્મેરાનનસ્ય દ્યુતિભિરભિનવૈઃ પાણિપદ્માન્તરાલ-
    પ્રોદ્યત્કાન્તિ પ્રરોહૈર્નભસિ ચ રચયન્ જાલમહ્નાં પતીનામ્ ।
નવ્યામમ્ભોદમાલામધિધરણિરુચા પાર્શ્વગાયાશ્શિવાયાઃ
    ચિત્રં યો નાનટીતિ ભ્રમરસનટનકૃત્કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૨૦॥

અચ્છામચ્છિન્નધારામમૃતકરરુચેર્વર્ષયન્ લબ્ધકામાં
    દીનામત્યન્તખિન્નાં રતિમપિ મુદિતાં સંવ્યધાદીશ્વરો યઃ ।
યદ્ગઙ્ગાખણ્ડલાશામધિગતપરમાનન્દકૂપામ્બુપાનાત્
    વાચાલત્વં પ્રપન્નાસ્સુરગુરુમુખરાઃ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૨૧॥

ઓઙ્કારસ્વર્ણ સંસત્પ્રસૃતપરશિવજ્યોતિરાનન્દનૃત્તા-
    લોકાદુત્તીર્ણમુગ્રં ભવમતિવિપુલં વાર્ધિકલ્પં મુનીન્દ્રૈઃ ।
ઊહાપોહાદિહીન સ્વતનુગતજગદ્વૃન્દમધ્યાત્મવિદ્યા-
    બોધાચાર્યં પુરાણં પ્રશમિતતમસં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૨૨॥

દક્ષાદ્ધામાચ્ચ પૃષ્ઠાત્ દ્રુહિણહરિહરાન્ સર્વસમ્પત્સમૃદ્ધાન્
    કલ્પારમ્ભે ય ઈશોઽપ્યનિતરસુલભસ્વેચ્છયા સપ્રમોદમ્ ।
સૃષ્ટ્વા સંસૃષ્ટિરક્ષાલયકરણવિધૌ યોજયિત્વા તુ વાણી-
    લક્ષ્મીગૌરીતિ શક્તિત્રયમપિ ચ દદૌ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૨૩॥

કાચિન્નાલાયનીતિ પ્રથિતમુનિસતી ભર્તુરિષ્ટાનુકૂલા
    માણ્ડવ્યપ્રોક્તશાપજ્વલનશમનકૃદ્દુર્દિનશ્રીવિલાસા ।
યન્મન્ત્રધ્યાનયોગાદનિતરસુલભાન્ પઞ્ચ કાન્તાન્ નરેન્દ્રાન્
    લેભે જન્માદિહીનં શિવપદમપિ તં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૨૪॥

સિંહસ્કન્ધાધિરૂઢં સિતવસનધરં સિન્ધુસમ્બદ્ધશીર્ષં
    સિઞ્ચન્માધ્વીમધૂકપ્રમુખસુમગણોદ્દામભૂષામનોજ્ઞમ્ ।
સિદ્ધાદિત્યાહિ વિદ્યાધર પિતૃ દિવિષદ્દૈત્યગન્ધર્વયક્ષો-
    રક્ષોયોગીન્દ્ર સાધ્યાખિલ જનવિનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૨૫॥

પ્રત્યાહારાદિયોગૈર્હૃદયકમલતો બ્રહ્મરન્ધ્રં સ્વકીયં
    પ્રાણાનાનીય દિવ્યં ગણમપિ શરદાં વાહયન્તો મહાન્તઃ ।
યોગીન્દ્રાસ્સિદ્ધવિદ્યૌષધિમણિગુલિકાસેવયા વજ્રદેહાઃ
    સ્વાત્માનં યં ભજન્તિ જ્વલનવરદૃશં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૨૬॥

સાનાવસ્મિન્કિમર્થં વસત સુરવરા ગચ્છતાદ્યાખિલેશ-
    ક્ષેત્રાધારં ધરાયા હૃદયકમલગં પુણ્ડરીકાભિધાનમ્ ।

ક્ષેત્રં તત્રૈવ દેવો દશશતકલયા રાજતીતિ પ્રિયોક્ત્યા
    નન્દી યદ્દર્શનાર્થં ત્વરયતિ ચ ગિરેઃ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૨૭॥

સૃષ્ટ્યર્થં બ્રહ્મણા યસ્સ્તુતનિજવિભવસ્તસ્ય લલાટદેશાત્
    આવિર્ભૂય સ્વતન્ત્રો વિકૃતતનુવરાન્ રુદ્રવર્ગાન્ ગણેન્દ્રાન્ ।
સૃષ્ટ્વા તાન્પ્રેરયિત્વા જગદવનવિધૌ સર્વદા સત્વસંસ્થો-
    ઽરક્ષદ્વિશ્વાધિકં તં નતજનસુખદં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૨૮॥

વાચાં કેલિષ્વમન્દં દિતિજદિવિષદોર્મુષ્ટિમુષ્ટીરણેઽબ્ધેઃ
    તીરે જાતે સુધાઢ્યં ઘટમપિ કલયન્હસ્તકોણે મુરારિઃ ।
સમ્મોહ્યાધાન્ દ્વિતીયાનરચયદમૃતાન્ કામિની કામિનીનાં
    ભૂત્વા યશ્શૂલપાણેરનવધિદયયા કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૨૯॥

પદ્મે માસ્ત્વધ લીલાફણિપતિશયનં વૈનતેયોઽપિ નાલં
    ભૂમિ ત્વં શીઘ્રમાયાહ્યહમપિ નટતે તિલ્લવન્યાં પુરારેઃ ।
હસ્તાભ્યાં વાદયિષ્યામ્યહહ ચટુતરં મદ્દલં ચેત્યુદીર્ય
    પ્રાયાદ્યદ્રઙ્ગમાદૌ હરિરપિ તમજં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૩૦॥

પશ્યેદં સ્વર્ણશ‍ૃઙ્ગં મમ સદનવરં ગૌરિકેદારસંજ્ઞં
    કાશીં કાઞ્ચીપુરીમપ્યરુણગિરિવરં શ્વેતકાન્તારદેશ્યમ્ ।
વેદારણ્યં ચ સેતું મુહુરપિ વૃષભં યોઽધિતિષ્ઠન્પ્રિયાયૈ
    નિર્દિશ્યાપ્નોતિ નૈજં નિલયમનુદિનં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૩૧॥

સ્વામિન્ ભિક્ષો ભવેદ્વા ક્વ નુ તવ નગરે પર્વતે વા વને વા
    વાસઃ કસ્માદિહ ત્વં ચરસિ વદ વિભો કુત્ર ગન્તાઽસિ ભિક્ષામ્ ।
કુર્વન્નત્રૈવ તિષ્ઠન્ વિરચયતુ ભવાન્ કેલિમસ્માભિરેવં
    સ્ત્રૈણં યં ચાભ્યધાવદ્વનભુવિ વિવશં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૩૨॥

વામા વામાઙ્ગભાગો નયનમપિ જટાઃ કુણ્ડલૌ યજ્ઞસૂત્રં
વાહો બાણશ્ચ ચાપધ્વજરથતુરગા યસ્ય જાતા વિચિત્રમ્ ।
સૂતશ્ચાપિ સ્ફુલિઙ્ગૈર્નિટિલનયનજૈર્દાહયિત્વાઽણ્ડજાલં
કલ્પે કલ્પે પુનર્યસ્સૃજતિ તદખિલં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥

પાદાઙ્ગુષ્ઠસ્ય યસ્ય દ્યુતિકવચિતદિક્ચક્રવાલાન્તરાલે
    બ્રહ્મા હંસં મુરારિઃ કલશજલનિધિં દેવરાજો ગજેન્દ્રમ્ ।
સ્વં છત્રં વાજપેયી દિનકરશશિનૌ સૈંહિકેયશ્ચ શુક્લં
    વર્ણં શિલ્પી નિતાન્તં મૃગયતિ સતતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૩૪॥

જ્ઞાનેચ્છાભ્યાં સખિભ્યાં સહ રહસિ મુદા નક્તમશ્રાન્તલીલો
ભૂત્વા પ્રાતસ્સભાયામિહ કિમુ ભવતસ્સાહસં નન્દનીયમ્ ।
યાતુ સ્વર્ગાપગાયા નિકટતટમયં નાર્થનીયો જનશ્ચે-
ત્યુક્ત્વા સાચીકૃતામન્વનયદગસુતાં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૩૫॥

કલ્પાન્તે વૃદ્ધિભાજાં કબલિતજગતાં સપ્તવારાન્નિધીનાં
મધ્યે પાલાશશાયી હરિરિહ પુરુષો નાસ્તિ મત્તોઽપરોઽન્યઃ ।
એવં દર્પાવલીઢોઽપ્યનુપદમુદિતં શૂલિનં ભૈરવં યં
દૃષ્ટ્વા ભીત્યા નનામ સ્તુતિભિરભિનવૈઃ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૩૬॥

યત્સંહારાસ્રવેગં મુહુરપિ હૃદયે તર્કયન્નમ્બરાન્તે
પ્રાણત્રાણાય યત્નં દશરથનૃપતેર્યુદ્ધરઙ્ગે પ્રકુર્વન્ ।
રોહિણ્યાકારચક્રાનુગતિમપિ જહૌ સૌરિરર્કાત્મજાતઃ
તં દેવં રાહુકેતુગ્રહમુખવિનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૩૭॥

ઇન્દુર્યત્ક્ષેત્રસેવાસમસમયવલત્તિલ્વવૃક્ષાનિલાનાં
સ્પર્શાદુન્મૃષ્ટવર્ષ્મા સુરગુરુયુવતીસઙ્ગજૈઃ પાપરોગૈઃ ।
યદ્વક્ત્રાલોકનેન સ્વતનુપરિગલચ્ચન્દ્રિકાસારસિક્તાન્
સર્વાન્લોકાનકાર્ષીત્શમનમદહરં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૩૮॥

કાલિન્દીવીચિજાલૈર્ભુવનમહિપતેર્નીતમાનન્દભાજં
કાન્તં સીમન્તિનીતિ ક્ષિતિપતિતનયા કાચિદૌપાસનૈસ્તૈઃ ।
સૌમ્યૈરુદ્દામકલ્પૈઃ પ્રમુદિતમનસો યસ્ય શમ્ભોઃ પ્રસાદાત્
પ્રાપાવૈધવ્યયોગં સુખમપિ નિખિલં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૩૯॥

વિષ્ણૌ નિર્જ્વાલચક્રે ભ્રમિતહૃદિ વિધૌ ભાસ્કરે દન્તહીને
શક્રે નિર્ભિન્નગણ્ડે હુતભુજિ વિશિખે ત્યક્તજીવેઽખિલેઽન્યે ।
છિત્વા દક્ષોત્તમાઙ્ગં મખભુવિ સગણં વીરભદ્રં ચરન્તં
દૃષ્ટ્વા યોઽતોષયત્તં પ્રમુદિતહૃદયં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૪૦॥

સાવિત્રીતિ પ્રસિદ્ધા નરપતિતનુજા કાનનાન્તઃ સ્વભર્તુઃ
પ્રાણાનાહર્તુકામં સભટમપિ યમં યસ્ય પૂજાપ્રભાવાત્ ।
સમ્મોહ્યાનમ્ય તસ્માત્પતિમપિ તનયાન્ રાજ્યમન્યાઃ સમૃદ્ધીઃ
લેભે તં કાલકાલં કટિતટફણિનં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૪૧॥

બ્રહ્મૈવાહં શિવોઽહં વિભુરહમમલશ્ચિદ્ઘનોઽહં વિમાયઃ

સોઽહં હંસસ્સ્વતન્ત્રસ્તદહમતિજરઃ પ્રજ્ઞયા કેવલોઽહમ્ ।
ધ્યેયધ્યાતૃ પ્રમાણૈઃ ગલિતમતિરહં નિશ્ચલોઽહં સદેતિ
પ્રાજ્ઞા યચ્ચિત્સભાયાં અતિશયમભજન્કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૪૨॥

કાન્તારે જાતુ કૃષ્ણો દ્વિજરવિમણિહૃદ્ભલ્લબન્દીકૃતાયાઃ
સૌન્દર્યાન્નિર્જિતાયાસ્સુરવરયુવતીં જામ્બવત્યાઃ પ્રિયાયાઃ ।
પાણિં જગ્રાહ યસ્ય પ્રતિદિનયજનાત્કીર્તિમાશાવિહારાં
લેભે તં સર્વવિદ્યાલયકરનટનં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૪૩॥

માલાદિગ્બન્ધ પૂજાકવચવરમહાયન્ત્ર વિદ્યારહસ્ય-
શ્રીમત્સાહસ્રનામસ્તવપરિવિલસદ્યન્નવાઙ્ગાનિ પૂર્વમ્ ।
સૂતશ્રીજૈમિનિભ્યાં રહસિ સકરુણં પ્રોક્તવાન્દીક્ષયિત્વા
પારાશર્યો મહર્ષિઃ શ્રુતિવિભજનકૃત્કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૪૪॥

સદ્યોજાતાદિમાનાં વદનજલભુવાં પઞ્ચકાદ્યસ્ય જાતાન્
મન્ત્રાંસ્ત્રૈલોક્યવશ્ય પ્રમુખવર મહાસિદ્ધિદાન્સપ્તકોટીન્ ।
શ્રુત્વા ગૌરી યદુક્ત્યા જગદુપકૃતયે સપ્રયોગાન્સકલ્પાન્
તાન્લોકાનાનિનાય સ્વયમતુલકૃતિં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૪૫॥

અદ્રાક્ષીન્નન્દિકેશઃ કનકસદસિ યં હ્યર્ધનારીસ્વરૂપં
પશ્ચાન્નારાયણાર્ધં પુનરપિ ગિરિજારૂપમાકારહીનમ્ ।
તારં તન્મણ્ડલાન્તર્જ્વલનમનુપમં સચ્ચિદાનન્દમૂર્તિં
નૃત્તેશાનં મુહૂર્તં તમપરસુગમં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૪૬॥

પાર્વત્યુત્સઙ્ગદેશસ્થિતિમધિજુષતોઃ સ્કન્દહેરમ્બયોસ્તા-
વાહૂયાદ્યાખિલાણ્ડાન્ઝટિતિ ચ યુવયોઃ કસ્સમર્થોઽટને સઃ ।
સ્વીકુર્યાદિતદામ્રં ફલમિતિ નિગદન્નગ્રતો યસ્તદીયં
વૃત્તં દૃષ્ટ્વા મુમોદ ક્ષિતિધરશિખરે કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૪૭॥

નાનાજીવાત્મવાદિ પ્રકટિતકુનયાભાસયુક્ત્યદ્રિપક્ષ-
દ્વન્દ્વચ્છેદાનુધાવડ્ડમરુકમુખરજ્ઞાત સત્યાર્થલોકમ્ ।
વાઞ્છાકલ્પદ્રુકલ્પ પ્રપદયુગનત બ્રહ્મનિષ્ઠાવલિં તં
ચિન્માત્રં ચિત્સભેશં નિરતિશયગુણં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૪૮॥

વિષ્ણોશ્ચક્રાપહર્તુઃ પ્રથિતબલજુષો ભૂતચક્રાધિપસ્ય
ક્ષુત્તૃટ્દુઃખપ્રશાન્તિપ્રદનિજચરિતસ્તબ્ધપાણ્ડ્યાત્મજાતમ્ ।
શ્વશ્રૂવાઞ્છાભિપૂર્ત્યૈ નિજધુરિ ચ મુદાઽઽનીત સપ્તામ્બુરાશિં

ભક્તસ્ત્રીપક્વપિષ્ટાશનરુચિમુદિતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૪૯॥

અત્રેઃ કાન્તાઽનસૂયા નિખિલજનનુતા યં સમભ્યર્ચ્ય પુત્રં
દત્તાત્રેયાભિધાનં ત્રિમુખમપિ ચતુર્બાહુમદ્વૈતવૃત્તિમ્ ।
શ્રુત્યન્તોદ્દામલીલં સકલમુનિતતેરગ્રગણ્યં મહાન્તં
લેભે તં સ્વાત્મબુદ્ધત્રિભુવનચરિતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૫૦॥

કલ્પારમ્ભે યદીયાદ્ધરગલવિવરાદોમથેતિ દ્વિશબ્દૌ
સિદ્ધાન્તાર્થ પ્રબોધ્દૃપ્રવરશિવકરાવાવિરાસ્તાં પુરસ્તાત્ ।
પશ્ચાદ્વેદાદિ વિદ્યાવિધિહરિમુખરા દેવતાસ્સર્વલોકાઃ
જાતાસ્તં દક્ષિણાસ્યં દ્યુતિકરનિલયં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૫૧॥

સઙ્કલ્પોલ્લાસહીનં સરિગમપધની સપ્તવર્ણાનુવર્ણ-
પ્રારમ્ભોદ્ગાનલોલાખિલ સુરયુવતી વૃન્દસઙ્કીર્ણરઙ્ગમ્ ।
નાદધ્યાનાનુમોદાગતનિજનિકટાનેક સિદ્ધર્ષિદેવ-
સ્તોત્રધ્વાનૈર્નિતાન્તૈર્જિતજલધિરવં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૫૨॥

દોષાં સાહસ્રયુગ્મૈર્ધૃતપરશુમુખૈરાનનાનાં સહસ્રૈઃ
ત્રૈસાહસ્રૈસ્તથાક્ષ્ણામપરિમિતજટાધોરણી ધાટિકાભિઃ ।
જ્વાલામાલાભિરગ્રૈરપહસિતઘનૈરટ્ટહાસૈર્વિશાલૈઃ
નિધ્વાનૈર્યોઽન્તકાલે વિહરતિ તમજં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૫૩॥

શેષે જાતુ સ્વભોગાત્સુરગિરિશિખરં વેષ્ટયિત્વા નિતાન્તં
ત્રૈલોક્યપ્રાણભૂતાં કબલયતિ તનૂં નારદાત્ જ્ઞાતવૃત્તઃ ।
વાયુર્યદ્ધ્યાનયોગાત્ પ્રબલતનુરયાત્ ભુગ્નવક્ત્રં સ ભૂભૃત્ -
શ ृઙ્ગં ચિક્ષેપ વાર્ધૌ ફણિપતિમપિ તં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૫૪॥

વિશ્વામિત્રપ્રયુક્તાત્ સ્વપુરસુતસુહૃત્કામિની વિપ્રયોગાત્
ક્લિશ્યન્નાલીકવાર્તાં ગદિતુમપિ પટુઃ પૂજયા યસ્ય નિત્યમ્ ।
લબ્ધ્વા સ્વાં સમ્પદં તામભજદથ હરિશ્ચન્દ્રસંજ્ઞો નરેન્દ્રો
ધામ સ્વાયમ્ભુવં તં નિગમરથવહં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૫૫॥

આબાલ્યાત્ દ્રવ્યમેતત્સુમુખિ તવ મુદે યન્મયાત્તં તદદ્ય
સ્વીકુર્વાણા નિતાન્તં મદનશરહતં ગાઢમાલિઙ્ગ્ય દોર્ભ્યામ્ ।
અત્રૈવાશ્વાસયેતિ ત્વરિતગતિમુમામાલિભિર્વારિતોઽપિ
શ્રીમાન્યો હ્યન્વગચ્છન્નગતટભુવિ તં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૫૬॥

આલિ ત્વં સાન્ત્વયાર્યાં મયિ કુપિતધિયં દારુકારણ્યવાસિ-
સ્ત્રીણાં કેલીવિલાસૈર્હરિધૃતસુતનોસ્સાહસાત્પર્વતેન્દ્રે ।
સઙ્ગાદ્દિવ્યાપગાયા મદનદહનતશ્ચેતિ સાકૂતમુક્ત્વા
કાન્તાગારે જયાં યોઽગમયદસુલભં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૫૭॥

યશ્શમ્ભુર્લીલયા સ્વં જનિમ સુખકરં તાપસાનાં વચોભિઃ
હસ્તાદુત્પાટ્ય દેવૈઃ કિમિદમિતિ ભયાદ્વીક્ષિતોઽરણ્યદેશે ।
ચિક્ષેપ બ્રહ્મવિષ્ણુસ્તુતિભિરપિ પુનસ્તાન્મુનીન્ જ્ઞાતતત્ત્વાન્
કૃત્વાઽપ્યન્તર્દધે તં પ્રણતફલકરં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૫૮॥

સિદ્ધાકારપ્રગુમ સ્વતનુમપિ જગદૃષ્ટમાહેન્દ્રજાલં
ચિત્રસ્તમ્ભસ્થિતેન પ્રચલિતકરિણા ભુક્તપુણ્ડ્રેક્ષુખણ્ડમ્ ।
મુક્તાહારાપહાર ભ્રમિતનરપતિ સ્તોત્રનિર્નિદ્રિતાન્તઃ
પદ્મં સાહસ્રનેત્ર પ્રમુખનુતપદં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૫૯॥

મૌલૌ ગઙ્ગા ગલાન્તર્ગરલમહિતતેઃ કઙ્કણં દોષિ ફાલે
ચન્દ્રં તાર્તીયનેત્રં જ્વલનસમશિખં શૂલમાજં કપાલમ્ ।
ભૂતપ્રેતાદિસેના નિગમમયશુનો યસ્ય લીલાકિરાત-
સ્યાગ્રે દૃષ્ટ્વા કિરીટી ભ્રમિતમતિરભૂત્કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૬૦॥

કસ્તૂરીપઙ્કલેપં મૃગમદતિલકં પુષ્પમાલાં ચ નૂત્નાં
દૃષ્ટ્વા જાત્વમ્બુજાક્ષી ધરણિધરસુતાઽપ્યન્યથા તર્કયન્તી ।
નાથેદં લક્ષ્મ સત્યાં મયિ તવ સમભૂત્ બ્રૂહિ કસ્યા મુદે ચે-
ત્યાયાન્તં નિર્બન્ધાધિકશપથમરં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૬૧॥

કથ્યં કલ્પદ્રુકામ્યં કરિવસનધરં કૃષ્ણરક્તાઙ્ગવર્ણં
કાલાતીતં કવીન્દ્રં કવિકુલવિનુતં ક્લૃપ્તલીલાવિશેષમ્ ।
કૃત્યાકૃત્યાદિશૂન્યં કુમતિવિરહિતં ક્રુધ્રબાણાસનાઙ્કં
કઙ્કાલં કાલિનૃત્તપ્રમુદિતહૃદયં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૬૨॥

સર્વેષામસ્મિ કર્તા પ્રભુરપિ જગતાં પાલકો નાશકશ્ચે-
ત્યુચ્ચૈર્વિષ્ણૌ કદાચિત્પ્રલપતિ ચ મુદા યસ્સ્વયં તત્સમક્ષમ્ ।
રુદ્રસ્સંહારમૂર્તિઃ સ્વતનુરુહતતેરાશુ વિષ્ણૂનસઙ્ખ્યાન્
સૃષ્ટ્વા તદ્દર્પવહ્નિં પુરભિદશમયત્કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૬૩॥

કાન્તાસંહારકુપ્યદ્ભૃગુમુનિગદિતં ભીકરં ઘોરશાપં
નાનાજન્મૈકહેતું શમયિતુમનિશં પૂજયન્તં મુકુન્દમ્ ।

ઉત્પત્તીનાં દશૈવ ત્રિજગદભિભવદ્દાનવાન્ શિક્ષિતું તે
ભૂયાદિત્યાદિદેશ પ્રભુરતિકૃપયા કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૬૪॥

લીલાં યસ્યાનભિજ્ઞા મખભુવિ યતિના યેન વેદ્યન્તરસ્મિન્
ક્ષિપ્તં યાવત્કપાલં નિરસિતુમબલા દ્યોસદશ્ચાસ્તુવન્ યમ્ ।
પૌરોડાશસ્ય ભૂયાદધિકરણમિદં સંયજન્તામિદાનીં
ઇત્યુક્ત્વાઽદર્શિ નૈજં નિગમમયવપુઃ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૬૫॥

દેવેન્દ્રે વૃત્રહત્ત્યા પરિભવતિ તદા સ્વર્ગરાજ્યાધિકારે
યુક્તં દર્પાવલીઢં નહુષનરપતિં કામિતારં નિતાન્તમ્ ।
પૌલોમી યસ્ય નામ્નાં મનનવિભવતઃ કુમ્ભજાતસ્ય શાપ-
વ્યાજાન્નિન્યે ધરાં તં જનકનૃપનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૬૬॥

દિક્કાલાદ્યૈર્વિચિન્ત્યં સ્વમનુમનનકૃન્માન્યમદ્વૈતસારં
મધ્યાદ્યન્તાદિ હીનં સકલજનમનોવૃત્તિદૃષ્ટારમાદ્યમ્ ।
માયાતીતં પ્રશાન્તં દ્યુતિકરમખિલજ્યોતિષામીશ્વરાખ્યા-
વાચ્યં તેજોમયં તં પરમપરનટં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૬૭॥

ભોગાત્પ્રારબ્ધકર્માપ્યધિકભયકરે સઞ્ચિતાગામિકે દ્વે
જ્ઞાનાન્નાશં પ્રયાતે ઇતિ નિગમવચાંસ્યાહુરેતત્પ્રસિદ્ધમ્ ।
તાન્યપ્યાલોકમાત્રાત્ નિજનટનતનોઃ પ્રાણિનાં જાતુ દિષ્ટ્યા
નિઘ્નન્ યચ્છન્ સુખં યઃ સદસિ વિજયતે કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૬૮॥

યઃ શમ્ભુર્ભૂર્ભુવસ્સ્વર્ભુવનપરિબૃઢૈસ્સંસ્તુતઃ સત્યવાદૈઃ
યસ્માત્સાર્વાત્મ્યયોગાનુભવનિપુણતાં લેભિરે યોગિવર્યાઃ ।
લીઢાલીઢાર્થતત્ત્વોપનિષદવિષયાકાશગો યશ્શિવસ્તં
પ્રત્યક્બ્રહ્મૈક્યનિષ્ઠાગુરુમમરનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૬૯॥

વમ્ર્યાકારત્વભાજા દિવિચરપતિના ખણ્ડિતેષ્વાસકોટિ-
ત્રુટ્યદ્વક્ત્રસ્ય પુંસો વપુરતિચકિતં વીક્ષયન્તો નિલિમ્પાઃ ।
યં સ્તુત્વા યન્નિદેશાત્તુરગમુખયુતં તં વિધાયાશ્વિનીભ્યાં
ચક્રુર્યજ્ઞં યથાવત્તમપિ નટપતિં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૭૦॥

સ્વામિન્ કૃષ્ણાત્ર યુદ્ધે કનકમયતનુર્ભૂતિમાન્ શૂલપાણિઃ
વક્ત્રાદગ્નિસ્ફુલિઙ્ગાન્ રણભુવિ વિકિરન્સઞ્ચરત્યદ્વિતીયઃ ।
કોઽયં બ્રૂહીતિ પાર્થે વદતિ સવિનયં વાસુદેવો મુહૂર્તં
યોગાત્ ધ્યાત્વાઽબ્રવીદ્યચ્ચરિતમનુપમં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૭૧॥

સત્યં બ્રહ્મૈવ નાન્યજ્જગદિદમખિલં ચેતિ મીમાંસયિત્વા
    ત્રૈયન્તોક્ત્યા બુધેન્દ્રા હૃદિ ચ યમનિશં ચિદ્ઘનં દુર્નિરીક્ષ્યમ્ ।
દીપજ્વાલાશિખાવત્સતતપરિચયાનન્દનૃત્તં વિમાયં
    શુભ્રં પશ્યન્તિ તત્સત્પદવિષયમરં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૭૨॥

વિદ્યામગ્નૌ પ્રતિષ્ઠાં પયસિ ચ ધરણૌ યોનિવૃત્તિં સમીરે
    શાન્ત્યાખ્યાં શાન્ત્યતીતાં નભસિ નિજકલાં યોજયન્ હ્યપ્રમેયઃ ।
સૂક્ષ્માત્સૂક્ષ્માન્તરઙ્ગે દહરકુહરચિત્પુણ્ડરીકાખ્યવેશ્મ-
    ન્યન્તશ્ચિન્માત્રરૂપં રચયતિ નટનં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૭૩॥

સૌવર્ણં વિષ્ટરં યઃ કનકઘટનિભૌ સ્વપ્રિયાયાઃ સ્તનૌ દ્વૌ
    પશ્યન્ લીલાકટાક્ષૈઃ કરજલજવરૈર્મણ્ડયન્સપ્રમોદમ્ ।
અધ્યાસીનઃ પુરસ્તાન્મણિમુકુરગતં સ્વાનુબિમ્બં શિવાયાઃ
    તુષ્ટ્યૈ ચાહૂતવાન્ શ્રીવિનુતનિજપદં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૭૪॥

ભૂવાય્વાકાશતોયજ્વલનરવિશશીયજ્વરૂપૈઃ પ્રપઞ્ચં
    યો ધત્તે મસ્કરીન્દ્રૈશ્ચ્યુતમલહૃદયૈઃ સેવ્યતે યસ્તુરીયઃ ।
હંસાભિખ્યોઽદ્વિતીયઃ સ્વગતનિખિલવિધ્યણ્ડજાલો હિરણ્ય-
    શ્મશ્રુસ્તં શાન્તકલ્પં નિયતિપદભરં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૭૫॥

યોઽદાન્નૈજોત્તમાઙ્ગામૃતકિરણસુધામણ્ડપિણ્ડીકૃતાઙ્ગં
    તેજોભગ્નેન્દુવહ્નિદ્યુમણિઘનરુચિજ્યોતિષં હીરકલ્પમ્ ।
નિત્યં દેદીપ્યમાનં પ્રતિસમયમપિ સ્વસ્ય પૂજાં વિધાતું
    લિઙ્ગં વિપ્રેષુ મોદાત્ ભવભયહરણં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૭૬॥

સ્વાત્માનન્દાનુબોધ પ્રવિતરણસભાતારભૂતોરુકક્ષ્યાં
    અધ્યાસીનૈર્વસિષ્ઠચ્યવનશુકમુખૈસ્તૈઃ પ્રસઙ્ખ્યાનયોગૈઃ ।
ઈડ્યં યં ચાશ્રયન્તઃ કકુબધિપતયો નાદ્રિયન્તે તથા સ્વં
    સ્થાનં તં તુમ્બુરૂક્તિ પ્રમુદિતહૃદયં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૭૭॥

શક્તેર્યસ્ય પ્રસાદાદધિધરણિ મહાનાદિશેષાવતારો
    યોગીન્દ્રો દેહભાજામઘમતિવિપુલં ચિત્તવાક્કાયસંસ્થમ્ ।
દૂરીકર્તું ચ યષ્ટું યમકૃતકપથા યોગશબ્દૌષધાર્ચા-
    ગ્રન્થાન્ પાતઞ્જલાખ્યાન્ સ્વયમપિ કૃતવાન્ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૭૮॥

દ્યૂતક્રીડાવિહારે શિવગિરિસુતયોઃ જાતુ મિથ્યોક્તિકુપ્યદ્-

ગૌરીવાક્ય પ્રભૂતામજગરતનુતાં ત્યક્તુમત્યન્તઘોરામ્ ।
કૈલાસોપત્યકાયાં યમપિ ચ તપસા તોષયન્ યત્પ્રસાદાત્
લેભે સ્વં પ્રાક્તનં તદ્વપુરપિ મુરભિત્કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૭૯॥

ત્રૈગુણ્યાનામતીતં ત્રિજગદભિનુતં સત્રિવર્ગાપવર્ગં
ત્રૈયન્તાચાર્યમૂર્તિં ત્રિપુટિવિરહિતં ત્રિસ્થમપ્યત્રિરૂપમ્ ।
તૃષ્ણાહીનાશયસ્થં ત્રિશિખવરધરં ત્ર્યક્ષમાત્રેયભૂષં
ત્રેતાનન્દં ત્રિકોણસ્થિતિજુષમચલં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૮૦॥

સ્વસ્ત્રીવક્ષોજયુગ્મે યમધિકકરુણં ભાવયિત્વા ચ ભક્ત્યા
રત્યા સન્તર્પ્ય તેન પ્રમુદિતમનસો નૃત્તમૂર્તેઃ પ્રસાદાત્ ।
યસ્યાભૂલ્લોકજેતા સુમમયવિશિખો મન્મથઃ શ્રીકુમારઃ
તં દેવં સુન્દરેડ્યં ઘુસદનનટનં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૮૧॥

આયુર્યત્કૈટભારેઃ પરમમભિમતં પૂર્ણતામેતિ તાવત્
કલ્પો યસ્ય ક્ષણાર્ધો ભવતિ ચ સુગમઃ કિઞ્ચિદંશેન હીનઃ ।
ઇત્યાહુર્વેદવાચઃ કિમુત શતધૃતેઃ કિઞ્ચ દિક્પાલકાનાં
તં કાલં કાલભક્ષં ફણિફણનટનં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૮૨॥

કાલીં ચણ્ડોર્ધ્વનૃત્તાવનતમુખગણાં બ્રહ્મચામુણ્ડિકાખ્યાં
ગૌરીકોપાગ્નિજાતાં દિતિસુતભયદામંશયુક્તાં વિધાતુઃ ।
સ્વાગશ્શાન્ત્યૈ નિતાન્તં સવિધકૃતનુતિં યઃ કૃપાપૂર્ણદૃષ્ટ્યા
રક્ષન્સ્વક્ષેત્રપાલામકુરુત પરમં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૮૩॥

સર્વેશં સર્વસત્વપ્રકૃતિમવિકૃતિં સર્વદં સર્વભૂષં
સર્વાતીતં સદાખ્યં સકરુણનયનં સર્વવેદાન્તસારમ્ ।
સત્યં સદ્વ્યોમસંસ્થં સનકમુનિમુખૈરર્ચિતં સામગીત્યાં
ઉત્સાહં સંસદીશં સકલકવિનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૮૪॥

કર્તું ચાકર્તુમેતત્સકલમપિ જગચ્ચાન્યથા કર્તુમીશઃ
શક્તશ્ચાકાશતુલ્યો ભવિતુમપિ શિવો યસ્સમાધિક્યશૂન્યઃ ।
જાગ્રત્સ્વપ્નાતિશાયી પૃથુતરસુખકૃત્સ્થાન સંસ્થોઽપિ નૈજાં
માયામાવિષ્કરોતિ ત્રિવિધગુણમયીં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૮૫॥

સાકં ગૌર્યા હિમાદ્રેર્નિકટવરતટે સઞ્ચરન્ યોનિજાસ્ય-
સ્વેદોદ્ભતં પ્રભાભિર્વિજિતદિનકરં બાલમાહૂય મોદાત્ ।
ભૌમાભિખ્યામજાલિગ્રહયુગમનૃણાધીશ્વરત્વં ચ વાહં

શક્તિં ભૂષાં દદૌ તં દિવિચરવિનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૮૬॥

યસ્મિન્દૃષ્ટે પરસ્મિન્ન ચલતિ હિ મનો દેહભાજાં કદાચિત્
યસ્માત્કુત્રાપિ નાન્યો ભવતિ ચ પરમો દેવતાસાર્વભૌમઃ ।
એકો દાધર્તિ તિર્યઙ્ નિજવપુષિ જગત્પ્રોતમોતં સમસ્તં
તં ચિત્રં ચિત્રનૃત્તપ્રમુદિતગિરિજં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૮૭॥

કશ્ચિદ્ભૂપાલસૂનુર્વૃષભમુનિવરસ્યોપદેશાત્ યદીયાં
શૈવીં વિદ્યાં જપન્ચત્કવચનુતિમપિ પ્રાપ્તકામો બભૂવ ।
તં શર્વં વારિજાક્ષદ્રુહિણસુરપતિ પ્રેતનાથાગ્નિરક્ષઃ-
પાશીવાય્વીશયક્ષદ્યુમણિશશિનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૮૮॥

યદ્રઙ્ગસ્વર્ણકુમ્ભં દિનકૃદનુદિનં વીક્ષ્ય મેરુભ્રમેણ
રથ્યં સંરુધ્ય મધ્યે ક્ષણમપિ નિવસન્ યત્સપર્યાસુજાતમ્ ।
ઘણ્ટાભાઙ્કારઘોષં ત્રિશતદશમખીવેદમન્ત્રાશ્ચ ભૂયઃ
શ્રુત્વા તિલ્લીવનાખ્યં પુરમિતિ મનુતે કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૮૯॥

કણ્ઠે કાલો લલાટે હુતભુગુરગરાડ્ભૂષણં ચર્મ વસ્ત્રં
ભૂતિર્ગન્ધો વિહાયો નિલયમથ પુનઃ પુષ્પવન્તૌ ચ નેત્રે ।
વૃત્તિર્ભિક્ષા સ્વકાર્યં નટનમગસુતા પ્રેમકાન્તા ગજાસ્યઃ
સૂનુઃ યસ્યાતિચિત્રં સમજનિ સદયં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૯૦॥

યત્સંસત્સ્વર્ણભિત્તિં પરિતરનુપમાસ્સ્વર્ગનાર્યઃ કરાબ્જૈઃ
આદર્શાદ્યષ્ટભદ્રં કનકમણિમયં યસ્ય તુષ્ટ્યૈ વહન્ત્યઃ ।
સેવાં કુર્વન્તિ પઞ્ચાવરણમધિગતૈર્બ્રહ્મવિદ્યેશપૂર્વૈઃ
સ્તુત્યં તં ચિત્રકૂટસ્થિતિભિરથ સુરૈઃ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૯૧॥

ભક્તાસ્ત્રૈષષ્ટિસઙ્ખ્યા દ્વિજમુખકુલજા યત્સપર્યાવિશેષૈઃ
સારૂપ્યં યસ્ય નામ્નાં મુહુરપિ પઠનાત્ યસ્ય સામીપ્યસિદ્ધિમ્ ।
સાલોક્યં યસ્ય ભક્તિપ્રકરણજનતાસઙ્ગસમ્ભાષણાદ્યૈઃ
સાયુજ્યં યસ્ય ભાવાદનુપમમભજન્કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૯૨॥

યશ્ચિત્રસ્તમ્ભકક્ષ્યામધિવિશદખિલ પ્રાણિવર્ગાન્ વિશુદ્ધાન્
કુર્વન્ કશ્ચિન્ મહાત્મા પુરુષમૃગતનુર્યોગિરાડ્ યત્સભાયાઃ ।
પૂર્વસ્મિન્દ્વારદેશે નિવસતિ હૃદયે સન્તતં યં વિચિન્વન્
તં દેવં ચિદ્વિલાસપ્રકટિતનટનં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૯૩॥

ભેજે ત્રૈશઙ્કુવીયાં સ્થિતિમપિ ચ ગલે યસ્ય શમ્ભોઃ કરાલઃ
ક્ષ્વેલઃ કલ્પાન્તકાલજ્વલનકબલનજ્વાલકલ્લોલકીલઃ ।
સાતઙ્કાહાર્યજાયાસ્સભયમધુભિદો વારણપ્રેરણાભ્યાં
ભૂયો ભૂયસ્તમાદ્યં જલદગલરુચિં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૯૪॥

લોકેષ્વદ્વૈતવિદ્યાં પ્રકટયિતુમના યસ્સ્વયં કૃત્તિવાસાઃ
મોદાત્સર્વજ્ઞપીઠસ્થિતિજુષમમલં શઙ્કરાખ્યં યતીન્દ્રમ્ ॥

સ્વાંશાન્નૈજાઙ્ઘ્રિપૂજાપ્રશમિતતમસાં ભૂસુરાણાં કુલાબ્ધૌ
ઉત્પાદ્યાન્વગ્રહીત્તં શુકમુનિવિનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૯૫॥

પાતાલે મર્ત્યલોકે દિવિ ચ પુરરિપોર્યાનિ યાનિ પ્રિયાણિ
ક્ષેત્રાણ્યાસંસ્તદન્તઃસ્થિતિમધિજુષતાં લિઙ્ગબેરાદિમાનામ્ ।
હેતુઃ શ્રીમૂલનાથઃ શિવજનિમવરો યત્સભોદીચિભાગે
કક્ષ્યાયાં ભાતિ નિત્યં તમખિલજનકં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૯૬॥

બ્રહ્મન્સૃષ્ટિં યથાવત્કિમપિ ચ કુરુષે ભો હરે રક્ષકત્વં
સાધ્યં તે રુદ્ર ભાવં મમ ચ વહસિ કિં પાલ્યતેઽસૌ ત્રિલોકી ।
કેનાનુષ્ઠીયતે કિં ભુવિ ચ મુનિવરૈર્યજ્ઞ ઇત્યં સ્વસેવા-
નમ્રં યો દેવવર્ગં મુદયતિ વચસા કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૯૭॥

નિર્માતૄણાં ઘટાનાં કુલજલધિમણિર્નીલકણ્ઠાભિધોઽયં
પશ્યન્નિત્યં મુનીનાં નયવચનગણૈર્યોગિરાટ્પ્રત્યયાર્થમ્ ।
સ્વસ્ત્રીદણ્ડાગ્રહસ્તસ્સરસિ સશપથં ગાહમાનઃ પ્રપેદે
તારુણ્યં યત્પ્રસાદાત્તમનણુમગુરું કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૯૮॥

લાસ્યં દ્રષ્ટું યદીયં શિખિનિ દશશિરાંસ્યાજુહાવાતિભક્ત્યા
રક્ષોનાથસ્તથાદ્રેર્નિકટ ભુવિ ફણામણ્ડલં ભોગિરાજઃ ।
અન્યે દેવાશ્ચ દૈત્યાઃ તપસિ ચ કઠિને સ્વાં તનૂં નિર્દહન્તો
જાતાસ્સિદ્ધાશ્ચ સાધ્યા નરહરિવિનુતં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૨૯૯॥

સ્વામિન્ સંસારવાર્ધાવધિકભયકરે દુસ્તરે પાશનક્ર-
ચ્છન્ને મગ્નાન્તરં મામનધિગતસદાચારવૃત્તિં શઠાગ્ર્યમ્ ।
દીનં ત્વત્પાદપૂજાવિમુખમઘયુતં રક્ષ રક્ષેત્યજસ્રં
સર્વે લોકાશ્શ્રયન્તે યમપિ સદસિ તં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૩૦૦॥

યદ્યપ્યૈશ્વર્યભાજો વિધિહરિમુખરાસ્સન્તિ દેવા જગત્યાં

તેષાં કશ્ચિદ્યુગાન્તે નહિ પુનરપરો રુદ્ર એકો મહર્ષિઃ ।
દેવો વિશ્વાધિકોઽગ્ર્યો ભવતિ વિભુરિતિ પ્રાહુરશ્રાન્તવાચઃ
વેદા યં પઞ્ચભૂતપ્રભવલયકરં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૩૦૧॥

યસ્માચ્ચન્દ્રાર્ધચૂડાન્મૃદુહસિતમુખાન્નીલકણ્ઠાત્ ત્રિણેત્રાત્
વેદાન્તોદ્ગીતવૃત્તાદ્વિધિહરિજનકાત્ વિશ્વમાયાવિલાસાત્ ।
વામાવામાઙ્ગભાગાત્ ભસિત વરતનોઃ ચિત્સભેશાત્ મમૈતત્
ચેતો નાન્યં સુરેન્દ્રં સ્મરતિ નટપતિં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૩૦૨॥

બાલ્યે ક્રીડાવિમુગ્ધઃ પુનરહમભવં યૌવને મીનકેતોઃ
લક્ષ્યો લજ્જાવિહીનઃ પરમુદર ભૃતૌ કાકવત્સાર્વકાલમ્ ।
દેશાદ્દેશાદટંસ્ત્વત્પદયુગજલજં નાર્ચયં પાપયોગાત્
સર્વં તત્ક્ષમ્યતામિત્યયમહમભજં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૩૦૩॥

સદ્વૃત્તાં સ્રગ્ધરાઙ્ગાં વિપુલગુણવરાલઙ્કૃતિં મઞ્જુપાક-
સ્થાયીશય્યારસાદ્યૈર્વિબુધપરિબૃઢાહ્લાદિરીતિં સુવૃત્તિમ્ ।
વેદાન્તાર્થપ્રબોધ્રીં સુગુણપદગતિં યોઽસ્મદીયાં સ્તુતિં તાં
અઙ્ગીકુર્વન્સુખં મે પ્રદિશતિ ગુરુ તં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૩૦૪॥

યશ્શમ્ભુર્નૃત્તરાણ્મે પ્રબલતરમહામન્ત્રસિદ્ધિં પ્રદત્વા
ગુર્વીં યોગસ્ય સિદ્ધિં જનનમૃતિહરં ચાત્મબોધં મહાન્તમ્ ।
સૂતાદીનાં વિમુક્તિપ્રદમપિ મહિતં ગૌરવં પત્રમૂલં
સ્વં નૃત્તં દર્શયિત્વા સુખયતિ નિતરાં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૩૦૫॥

ક્રોશં ક્રોશં યદગ્રે સ્વપતિમપિ રતિર્મન્મથં શ્રીકુમારં
શાર્દૂલાઙ્ઘ્રેશ્ચ ડિમ્ભસ્સુખતરમભજદ્દુગ્ધ કલ્લોલરાશિમ્ ।
સ્તાવં સ્તાવં વરેણ્યં ગગનનટપતિં યં ચ વાચામલક્ષ્યં
તોષં તોષં લભન્તે સકલમપિ જનાઃ કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૩૦૬॥

મન્દં મન્દં યદીયં જનિમ સુરસરિદ્ધારયા વ્યાસજાદ્યાઃ
સેકં સેકં વિરાજો હૃદયમધિગતં યત્પદં ભાવયન્તઃ ।
કાલં કાલં દહન્તો દુરધિગમતમઃકાનનં જ્ઞાનયોગાત્
લાભં લાભં પ્રબોધં વરસુખમભજન્કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૩૦૭॥

ભોજં ભોજં યદર્ચાજનિતમનુપમં ભોગમધ્યાત્મયોગાત્
તારં તારં ભવાબ્ધિં વિપુલભયકરં યસ્ય ભાવાત્સુધીન્દ્રાઃ ।
દાહં દાહં હૃદન્તર્ગતમતિજરઠં પાશવર્ગં યદર્ણ

જાપં જાપં રમન્તે પરમહસિ પદે કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૩૦૮॥

બોધ બોધં યદીયં નટનમનુપમં શ્રૌતતત્ત્વાર્થગર્ભં
ધ્યાયં ધ્યાયં હૃદબ્જે યમપિ ચ મહસાં પુઞ્જમવ્યાજમૂર્તિમ્ ।
વાહં વાહં યદઙ્ઘ્રિં મનસિ ફણિતરક્ષ્વઙ્ઘ્રિં જૈમિન્યભિખ્યાઃ
પ્રાપુસ્સર્વે સદા યત્સદસિ નિવસતિં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૩૦૯॥

વાચં વાચં મહાન્તઃ શિવહરગિરિજાકાન્તદેવેતિપૂતાઃ
વર્જં વર્જં વિવર્જ્યં બહુતરવિષમક્લેશમાયાવિમોહમ્ ।
ત્યાગં ત્યાગં કઠોરાં ત્રિવિધપરિચયામીષણાખ્યાં પિશાચીં
ધ્યાયન્તો યં ભજન્તે સતતમપિ શિવં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૩૧૦॥

ધાવં ધાવં સદા યત્પ્રિયકરનિલયં ભૂતિરુદ્રાક્ષવર્ગૈઃ
ભૂષં ભૂષં સ્વકીયાં તનુમપિ ચરિતં યસ્ય વેદાન્તગીતમ્ ।
કર્ણં કર્ણં નિતાન્તં ત્રિષવણયજનં બ્રહ્મનિષ્ઠા યતીન્દ્રાઃ
કારં કારં લભન્તે ભવપદમભવં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૩૧૧॥

નામં નામં સદા યં નટપતિમલભં સત્કલત્રં સુપુત્રં
પાઠં પાઠં યદગ્રેઽપ્યકૃતકવચનાન્યાપમબ્જા કટાક્ષમ્ ।
વારં વારં વિભું યં હવિરહમદદાં સપ્તતન્તુષ્વચિન્ત્યં
નિત્યં નિત્યં પ્રપદ્યે શરણમસુલભં કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૩૧૨॥

શ્રાવં શ્રાવં શ્રુતિભ્યાં યદમલ ચરિતં યત્પદામ્ભોજમાધ્વીં
પાયં પાયં સભાયાં મમ ચ રસનયા યં પ્રભું માનસેન ।
સ્મારં સ્મારં પ્રસન્નં શ્રુતિશિખરગતં ભુક્તિમુક્તિપ્રદં યં
દર્શં દર્શં પ્રબુદ્ધોઽસ્મ્યતનુબુધદૃશા કુઞ્ચિતાઙ્ઘ્રિં ભજેઽહમ્ ॥ ૩૧૩॥

એતત્સ્તોત્રં પઠન્તિ પ્રતિદિનમસકૃદ્યે મમોમાપતેર્વા-
ગુદ્ભૂતં ચિત્સભાયાં વિરચિત પરમાનાન્દનૃત્તસ્ય શમ્ભોઃ ।
અગ્રે લબ્ધ્વાઽખિલેષ્ટાનિહ તનયકલત્રાદિમાનાત્મયજ્ઞાદ્
અન્તે કૈવલ્યસંજ્ઞં પદમપિ મનુજાસ્સંલભન્તાં નિતાન્તમ્ ॥ ૩૧૪॥

ઉમાપતિર્નામ વનાશ્રમોઽહં ત્રયોદશાધિક્યશતત્રયાન્વિતમ્ ।
શ્રીકુઞ્ચિતાઙ્ઘ્રિંસ્તવરાજમુક્ત્વા સાક્ષાદપશ્યં નટનં સભાપતેઃ ॥ ૩૧૫॥

ઇતિ શ્રીમદુમાપતિશિવપ્રણીતઃ શ્રી કુઞ્ચિતાઙ્ઘ્રિસ્તવઃ સમ્પૂર્ણઃ ।

Proofread by Aruna Narayanan

*Shri Kunchitanghri Stava*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*